लडादेः पदभेदेनोद्दिष्टं द्वैविध्यं निर्व्वक्ति ।

धात्वोरर्थस्य कर्त्तृत्वबोधकं क्यज्यङन्तयोः ।

परस्मैपदमाख्यातमात्मनेपदमेव च ।

क्यजन्तधातोरर्थस्य स्वार्थे कर्त्तृत्वेऽन्वयबोधनक्षमं यादृश माख्यातं तत्परस्मैपदं पुत्त्रीयतीत्यादावेव पुत्त्रादीच्छाकर्त्तृत्वमाश्रयत्वसम्बन्धं बोध्यते नतु पुत्त्रीयते इत्यादौ इच्छार्थस्य क्यचोनिर्देशात् चिचीयते इत्यादौ आत्मनेपदेऽतिप्रसङ्गः समपद्यत घातिता घातितारावित्यादावात्मनेपदानां निरुक्ताख्यातत्वेऽपि तदन्यत्वेन विशेषणान्न प्रसङ्गः । यङन्तस्य धातोरर्थस्य स्वार्थकर्त्तृत्वबोधनक्षममाख्यातमात्मनेपदं चैत्रः पापच्यते इत्यादिकमेव पौनःपुन्यविशिष्टस्य पाकादेः कर्त्तृत्वं बोधयति नतु पापच्यतीत्यादिकं बोभवीतीत्यादौ तु यङो लुकि धातोर्न तदन्तत्वं श्रुतिगर्भत्वादिदृष्टान्तत्वस्य पचतामित्यादौ परस्मैपदस्य वारणं पूर्व्ववत् । अत्रोभयपदिधातूनां यत्र क्रियाफलं कर्त्तृनिष्ठं तत्रात्मनेपदं यत्र च कर्त्तृभिन्ननिष्ठं तत्र परस्मैपदं साधु स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रेण कर्त्तारमभिप्रैति सम्बध्नातीति व्युत्पत्त्या कर्त्तृसम्बन्धे क्रियाफलएवात्मनेपदस्य विधानात् । अतएव स्वरितञित्ण्यन्तधातूनां कर्त्तृनिष्ठे क्रियाफले । आत्मनेपदमुद्दिष्टं तदनिष्ठे पदान्तरमित्यापिशलीयाः पठन्ति । तदनुसृत्यैव दानादिस्थले स्वगते फले ददे इत्येवं परगते तु ददानीत्येव वाक्यं प्रयुञ्जते वृद्धाः । स्वर्गकामोयजेत इत्यादौ च सामान्यतः श्रुतमपि फलं कर्त्तृनिष्ठमेव शास्त्रदेशितं फलमनुष्ठातरीति मीमांसयोत्सर्गतस्तथा कल्पनादिति प्राञ्चः । चिन्तामणिकृतस्तु यत्र क्रियाफले कर्त्तुरभिप्रायइच्छा तत्रैवात्मनेपदमिति सूत्रार्थस्तेन याजकाद्यैर्दक्षिणादिलाभेच्छयैव यागादिकरणे यजन्ति याजकाः पठन्ति पाठकाः इति परस्मैपदं परगतस्यापि यागादिफलस्येच्छया तत्करणे

तु यजन्ते याजका इत्यादिकः साधुरेव प्रयोगोऽतएव पितृस्वर्गकामः पुष्करिण्या यजेत इत्यादावप्यात्मनेपदं धनकामो गणपतिं मोक्षकामोऽर्चयेद्धरिमित्यादौ च परस्मैपदं सङ्गच्छते इत्याहुः ।

लोटं लक्षयति ।

स्ववक्त्रनुमतत्वस्य धात्वर्थेऽन्वयबोधने ।
अनुकूला यादृशी तिङ् सैव लोट् परिभाष्यते ।

करोतु कुरुतां कुर्व्वन्तु इत्यादौ तुप् ताम्प्रभृतयश्चैत्राद्युक्तत्वधीसहकृताः इत्यादौ प्रकृत्यर्थे चैत्राद्यनुमतत्वं बोधयन्ति न तु तिबाद्याः अर्थापत्तिगुरूणामित्यादौ वक्त्रनुमतत्वं न धात्वर्थेऽनुभाव्यते किन्तु तदर्थे नवा स्ववक्तृत्वेन ज्ञातस्य । पत्नी पचत्वित्यादौ अनुज्ञैव लोटोऽर्थः सा च कर्त्तुरिष्टत्वे सति वक्त्रनुमतत्वं तेन चैत्रवक्तृकतादृशवाक्यात् चैत्रानुमतस्वेष्टस्य पाकस्य कर्त्री पत्नीत्येवं बोधः । शूलं विश विषं भुङ्क्ष्वेत्यादिराजवाक्यस्थले तु नानुज्ञा प्रत्ययार्थः शूलप्रवेशादौ कर्त्तुरिष्टत्वाभावात् किन्त्वाज्ञैव सा च वक्त्रनुमतत्वे सति कर्त्तुरनिष्टहेतुत्वं तथाच राजानुमतस्वानिष्टहेतुशूलप्रवेशकर्त्ता त्वमित्याकारस्तत्र बोधः । पर्व्वतमप्युत्पाटयानि समुद्रमपि शोषयाणीत्यादौ लोटः समर्थना अर्थः सा च पराशक्यधर्म्मिकस्वशक्यत्वाध्यवसायः तथाच स्वेतराशक्यं यत् पर्व्वतोत्पाटनं तद्धर्म्मिकस्वशक्यत्वाध्यवसायवान् इत्येवं तत्रान्वयबोधः । स्वीयैकार्थविशिष्टप्रकृत्यर्थान्वयिस्वार्थान्तरबोधकत्वञ्च प्रत्ययस्य नाव्युत्पन्नमिति वक्ष्यते । अस्तु वा निपातस्यैवापेर्धात्वर्थान्वितं पराशक्यत्वमर्थः तिङस्तु स्वशक्यताध्यवसायमात्रम् अध्यवसायावधारणं क्वचिद्वक्त्राशंसनमपि लोडर्थस्तेन चैत्रोक्ताज्जीवतु भवानिति वाक्यात् चैत्राशंसाविषयवर्त्तमानजीवनवांस्त्वमित्येवं तत्र बोधः । घटो नीलो भवतु भवान् सुखी भवतु इत्यादौ तु धातुनैव लक्षणयोपस्थापितायां नीलाद्युत्पत्तौ तिङा

आशंसनीयत्वं प्रतीयते नामार्थस्य नीलादेर्धात्वर्थोत्पत्तौ भेदेनान्वयस्याव्युत्पन्नत्वात् एवञ्चाशंसाविषयवर्त्तमाननीलोत्पत्तिमान्नीलो घट इत्यादिकस्तत्र बोधः । अस्तु वा नीलादिपदसन्दंशवशान्नीलादिविशिष्टस्यैव स्वस्याधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपोत्पत्तिस्तत्र धात्वर्थः ।

लिङं लक्षयति ।

> लोड् लड्न्या विधेर्बोधसमर्था तिङ् लिङुच्यते ।
> प्रवर्त्तकचिकीर्षाया हेतुधीविषयो विधिः ।

विध्यन्वयबोधं प्रति समर्था लटो लोटश्च भिन्ना तिङ् लिङुच्यते । विधिस्तु नेह कृत्यात्मकं विधानमाख्यातमात्रस्यातद्बोधसमर्थत्वात् किन्तु प्रवर्त्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं स तथा तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वञ्च प्रत्येकमेव यागपाकादिधर्म्मिकतन्निश्चयादेव यागादिधर्म्मिकचिकीर्षोत्पत्त्या तत्र प्रवृत्तेरेवञ्च यजेत पचेतेत्यादौ यागः कृतिसाध्य इष्टसाधनं बलवदनिष्टाननुबन्धी च इत्याकारको बोधः पटमानय इत्यादौ सप्तमं पदं गृह्णातीत्यादौ च विधिं बोधयन्त्यावपि लोट्लटौ न ताभ्यां भिन्ने यष्टव्यं देयमित्यादौ तु तव्यादिकं कार्य्यत्वादिकं बोधयदपि न तिङ्भावित्वाद्यप्रत्यायकत्वेन विशेषणाच्च पच्यादित्यादावाशीर्लिङि न प्रसङ्गः । यद्यपीदानीन्तनस्वकृतिसाध्यताज्ञानस्यैव प्रवर्त्तकत्वमन्यथा स्वस्यैव कालान्तरीणायाः परस्य चेदानीन्तन्याः कृतेः साध्यताग्रहादपि प्रवृत्त्यापत्तेः तथाच इदानीन्तनस्वकृत्यन्तर्भावेनापि लिङः शक्त्यापत्तिरतः प्रवर्त्तकज्ञानप्रकारत्वं तत्राप्रयोजकं तथापि पङ्गुः समुद्रं न तरेदित्यादौ नञादिना समुद्रतरणादेः पङ्गुप्रभृतिकृतिसाध्यत्वनिषेधबोधानुरोधादवश्यं कृतिसाध्यत्वं लिङर्थः तथा तृप्तिकामो जलं न ताडयेदित्यादौ तृप्तिकामेष्टसाधनत्वस्य न कलञ्जं भुञ्जीते-

त्यादौ च कलञ्जभक्षणादेः बलवदनिष्टाजनकत्वस्य निषेधानुपपत्त्या इष्टसाधनत्वादिकमपि । नचाहोरात्रावच्छेद्यभोजननिवृत्तिरूपस्योपवासस्य कृत्यसाध्यत्वादष्टम्यामुपवसेदिति विधेर्बाधः कृत्यधीनसमय सम्बन्धरूपस्य लौकिककृतिसाध्यत्वस्य नित्येऽप्यनपायात् तादृशप्रयोगे भोजनादिप्रतिकूलव्यापारस्यैव वा धात्वर्थत्वात् पाकं कुर्य्यादित्यत्र कृतिसाध्यत्वस्य जलं ताडयेदित्यत्रेष्टसाधनत्वस्य श्येनेन यजेत इत्यादौ च बलवदनिष्टाजनकत्वस्य धात्वर्थे बाधात्तत्र यथायोगमिष्ट साधनत्वादिकमेव लिङा प्रमाप्यते तदप्रामाण्यव्यवहारस्तु इष्टसाधन त्वादिभ्रमहेतुत्वप्रयुक्तः । यत्तु कृतिसाध्यत्वबलवदनिष्टाजनकत्वाभ्यां विशिष्टमेवेष्टसाधनत्वं लिङर्थ इति तद्बाधकतया जलं ताडयेदित्यादेरप्रामाण्यमेव तन्न कृतिसाध्यत्वादेर्विशेष्यविशेषणभावव्यत्यासेन गुरुतरशक्तिषट्कापत्तेः श्येनेनाभिचरन् यजेतेत्यादिश्रुतेरप्रामाण्यापत्तेश्च श्येनस्य वैरिवधकामकर्त्तव्यत्वेन बलवदनिष्टस्य दुरितस्यानुबन्धित्वात् नच तत्रेष्टसाधनत्वमात्रे लक्षणा तन्मतेऽपि अगम्यां गच्छेदित्यादेः प्रामाण्यस्य दुर्वारत्वापत्तेः न विधौ परः शब्दार्थ इत्यस्य व्याकोपापत्तेश्च । ननु बलवदनिष्टाजनकत्वविशिष्टेऽपीष्ट साधनत्वे लिङः शक्तिग्रहादिष्टसाधनतामात्रस्य श्येनादावनुभावकत्वसम्भवात् न तत्र लिङो लक्षणा यद्रूपेणान्वयधीस्तन्मात्रप्रकारक शक्तिज्ञानत्वापेक्षया लघुत्वेन तत्प्रकारकशक्तिज्ञानत्वेनैव तत्र हेतुत्वादतएव श्रोतव्यः श्रुतिवाक्येभ्यः इत्यत्र स्मृत्यादिभिन्नप्रमाणशब्दत्वेन शक्तमपि श्रुतिपदं प्रमाणशब्दत्वेन श्रुतिस्मृती बोधयन्न लाक्षणिकम् अन्यथा श्रुतिपदस्य वेदमात्रपरत्वे तज्जन्यशाब्दत्वेन मुक्तिहेतुत्वे नियमादृष्टकल्पनापत्तेरिति पक्षधरमिश्रैरप्युक्तमिति चेन्न पश्वादिपदस्यापि लाङ्गूलादिमत्तया मूषिकादिबोधने मुख्यत्वापत्तेः । स्यादेतत् इष्टसाधनत्वं यदि विध्यर्थस्तदा स्वर्गकामः पचेतेत्यादेरपि प्रमाणता

पत्तेः स्वर्गकामकृतिसाध्यस्य यागादेरोदनादिरूपेष्टसाधनत्वादिति चेन्न स्वर्गकामादिसमभिव्याहृतविधिप्रत्ययस्य स्वर्गादिरूपेष्टसाधनत्वान्वयबोधं प्रत्येव साकाङ्क्षत्वेनेष्टान्तरसाधनत्वे शक्तिसत्त्वेऽप्युक्तविधेस्तद्बोधकत्वासम्भवात् इयांस्तु विशेषो यदिष्टस्य स्वर्गत्वाद्यवान्तररूपेणैव यदि विधिवाक्याद्बोधस्तदा तादृशावान्तररूपेणैवेष्टं विधेः शक्यतावच्छेदकं नोचेदिष्टत्वेनैव अतएव विश्वजिता यजेतेत्यादौ इष्टसामान्यसाधनत्वस्यैव विधिना बोधनात् प्रवर्त्तकस्येष्टविशेषसाधनत्वावगाहिज्ञानस्य सम्पत्तये प्राच्यैः स्वर्गः फलं कल्प्यते। यत्तु साधनत्वमात्रं विध्यर्थः स्वर्गादिफलसाधनत्वन्तु स्वर्गकामादिपदसमभिव्याहारलभ्यमिति तत्तुच्छं पदानुपस्थितस्य स्वर्गादेर्विध्यर्थसाधनत्वेऽन्वयायोगात् स्वर्गकामादिवृत्तिशब्दैकदेशार्थस्य स्वर्गादेस्तत्रान्वये निराकाङ्क्षत्वात् फलाव्यवहितनियतपूर्व्ववर्त्तित्वविशेषात्मनः कारणत्वस्य फलगर्भतया तदनन्तर्भाव्य साधनत्वशक्तेरशक्यवचनत्वाच्च। नन्वेवं स्वर्गत्वावच्छिन्ना यावती व्यक्तिस्तत्प्रत्येकाधिकरणावच्छेदेन तत्प्रत्येकाव्यवहितप्राक्काले यद्धर्म्मावच्छिन्नस्य यादृशः सम्बन्धोऽन्यथासिद्ध्यनिरूपकस्तद्धर्म्मेणैव तादृशसम्बन्धेन स्वर्गत्वाद्यवच्छिन्नं प्रति साधनत्वं वाच्यं तच्च यागादौ बाधितमप्रसिद्धं वा यागत्वादेर्निरुक्तस्वर्गाव्यवहितपूर्व्ववर्त्तितानवच्छेदकत्वात् दानादितोऽपि स्वर्गाद्युत्पत्तेः सत्त्वगुणत्वादेश्च तादृशस्य स्वर्गत्वाद्यवच्छिन्नं प्रत्यन्यथासिद्ध्यनिरूपकत्वादतः कथमिष्टसाधनत्वं विधेः शक्यमितिचेत् सत्यं स्वर्गवृत्तियत्किञ्चिद्धर्म्मावच्छिन्नं प्रति साधनत्वस्यैव विध्यर्थत्वात् तस्य च स्वर्गवृत्तिवैजात्यविशेषावच्छिन्ना यावन्तस्तत्प्रत्येकाव्यवहितप्राक्कालवृत्तितावच्छेदकीभूतमश्वमेधत्वादिकमादायैव यागादौ सत्त्वात्। नचैवं वैधएव बोधे स्वर्गगतवैजात्यस्य भानादग्रेकल्प्यत्वव्याकोपः। स्वर्गवृत्तियत्किञ्चिद्धर्म्मत्वेन गृहीतस्यापि वैजात्यस्य यागविशेष-

जन्यतावच्छेदकजातित्वादिना कल्पनस्योदीच्यत्वात् यदि च जातित्व
सामान्यलक्षणया निखिलजात्युपस्थित्यनन्तरं जातिमत्त्वप्रत्यासत्त्या
जातित्वेन सकलजातिविशिष्टस्यानुभवे सत्युत्तरकालं शुद्धतत्तद्वै-
जात्येन विशिष्टस्य स्वर्गादेः स्मृतौ बाधकाभावः संस्कारसत्त्वेऽपि
जातित्वांशस्योद्बोधकाभावेनाग्रहणसम्भवात् समानप्रकारत्वेनैव हि
स्मृतावनुभवस्य हेतुत्वं न तु समानप्रकारतावच्छेदकत्वेन गौरवात्
यदि वा तत्तद्वैजात्यावच्छिन्नस्वर्गादिनिरूपितसमवायेन सुखादिमत्ता
ज्ञानानन्तरं तादृशवैजात्यावच्छिन्नसुखस्य उपनीतभानं प्रामाणिकं
संसर्गतासाधारणविशेषणताविषयताकज्ञानस्यैव विशिष्टधौ हेतुत्वात्
इत्थमेवच शुद्धमनस्त्वादिविशिष्टस्योपस्थितौ तत्र मनः पदादेः
शक्तिग्रह इति विभाव्यते तदा तत्तद्वैजात्यावच्छिन्नस्यैव स्वर्गस्य निरूप्य
साधनत्वं विधेः शक्यं शक्यग्रहमिति तदेव यागादौ सिद्धाद्यैरनु-
भाव्यतां अनुभाव्यतां वा स्वर्गप्रतियोगिकाभावप्रयोजकाभाव प्रतियो-
गित्वलक्षणमेव स्वर्गसाधनत्वं तच्च वैजात्यावच्छिन्नप्रतियोगिताकस्यैव
स्वर्गाभावस्य प्रयोजकीभूतोयोऽश्वमेधत्वाद्यवच्छिन्नाभावस्तत्प्रति-
योगित्वेन यागादेः सुघटमेव कारणाभावस्यैव कार्य्याभावप्रयोजक-
त्वात् । साधनतायाः पदार्थान्तरत्वमतेऽपि तन्मात्रस्य न लिङर्थत्वं
जलं न ताडयेदित्यादौ तस्य निषेधविधेरप्रामाण्यापत्तेः परन्तु
स्वर्गादिनिरूपितस्येति सम्प्रदायविदः । रत्नकोषकृतस्तु पाकादिकृति
त्वावच्छिन्नोद्देश्यताकेच्छाया एव पाकादिचिकीर्षात्वात् सैव पाकादौ
प्रवर्त्तिकेति तस्यां पाकादिकृतित्वावच्छिन्नधर्म्मिकेष्टसाधनताज्ञान-
त्वेन हेतुत्वात् कृतिगतमेवेष्टसाधनत्वं लिङर्थः तादृशचिकीर्षायां
क्रियाधर्म्मिकायाः कृतिसाध्यत्वस्येष्टसाधनत्वस्य वा धियः कारणत्वा
भावेन क्रियामतयोस्तयोरविध्यर्थत्वात् पाको मत्कृत्या साध्यतां इती
च्छायाः प्रवर्त्तकत्वेऽपि न तस्यां पाकधर्म्मिककृतिसाध्यताज्ञानत्वेन

हेतुत्वं मानाभावात् किन्तु मत्कृतिसाध्यपाकत्वावच्छिन्नधर्म्मिकेष्ट साधनताज्ञानत्वेनैव इष्टस्य तादृप्येण इच्छां प्रति तदवच्छिन्नधर्म्मिकेष्टसाधनत्वधियः कारणत्वस्य क्लृप्तत्वादन्यथा गृहवृत्तित्वादिविशिष्ट पाकत्वप्रकारकेच्छां प्रति पाकधर्म्मिकस्वगृहवृत्तित्वाद्यनन्तधर्म्मप्रकारकज्ञानत्वेनाप्यनन्तहेतुतापत्तेः एवञ्च स्वर्गकामो यजेतेत्यादाविष्ट साधनीभूतयागकृतिमान् स्वर्गकामइत्याकारएव बोध इति भावना विशेष्यएव स्वर्गकामादौ लिङादिना स्वार्थः संख्यानुभाव्यते अन्यथा यागः स्वर्गकामस्य कृतिसाध्यइत्यन्वये प्रथमायाः प्रकृत्यर्थमुख्यविशेष्यकान्वयबोधकत्वभङ्गप्रसङ्गः स्वर्गकामौ यजेतेत्यपि प्रयोगापत्तिश्च स्वार्थभावनाविशेष्यएव तिङः संख्याभिधायित्वेन स्वर्गकामस्यातथात्वे तत्र तिङर्थसंख्यायाउदासीनत्वात् । बलवदनिष्टाजनकत्वन्तु लिङर्थः स्वार्थकृताविव धात्वर्थेऽपि विशेषणत्वेनान्वेतुमर्हति प्रत्ययानामेकस्वार्थान्वयिपदान्तरार्थान्वयित्वेन स्वार्थान्तराबोधकत्वनियमस्य जानातीत्यादावेव व्यभिचारादित्यञ्च पङ्गुः समुद्रं न तरेदित्यादाविष्टसाधनीभूतायाः समुद्रतरणकृतेरभाववान् पङ्गुरिति तृप्तिकामो जलं न ताड़येदित्यादावपि इष्टसाधनत्वशून्याया जलताड़नकृतेराश्रयस्तृप्तिकाम इति परदारान्न गच्छेदास्तिकइत्यादौ बलवदनिष्टाजनकत्वशून्यायाः परदारगमनकृतेराश्रयश्चास्तिकइत्यर्थ इत्याहुः ।

इदन्तु बोध्यं बलवदनिष्टाजनकत्वमत्र न तीव्रदुःखाजनकत्वं बह्वायाससाध्ययागादौ तस्य बाधात् नापि बलवद्द्वेषविषयदुःखाजनकत्वं दुःखमात्रस्य विरक्तानां बलवद्द्वेषविषयत्वेनाथ्यावर्त्तकतापत्तेः तज्ज्ञानस्याप्रवर्त्तकतया तस्य विधित्वायोगाच्च यत्र बलवान् द्वेष स्तज्जनकताज्ञानत्वेन बलवद्द्वेषविषयत्वेन वा प्रवृत्तिसामान्यं प्रति प्रतिबन्धकत्वात् परन्तु नरकाजनकत्वं पापाजनकत्वं वा तद्विरहस्यैव

कलञ्जभक्षणादौ नञा बोधनात् । ज्वरार्त्तो नान्नमश्नीयात् इत्यादि
लौकिकविधौ तु ज्वरादिप्रयोज्यतत्तद्विजातीयदुःखाजनकत्वे लिङो
लक्षणा । तथा अष्टमचन्द्रे न गच्छेदित्यादावपि धातोर्गतिहेतु
दुरिते तेनाष्टमचन्द्रकालीनगतिहेतुदुरितं तत्तदनिष्टाजनकं मेत्येवं
तत्र बोधः अन्यथा तथाविधगतेः पापजनकत्वे तद्द्वारा कालान्तरभावि
दुःखजनकत्वे वा प्रमाणाभावेनासङ्गत्यापत्तेः । गोचरे वा विलग्ने
वा ये ग्रहा रिष्टसूचका इत्यादिवचनेभ्यो ग्रहाणां शुभाशुभसूचक
त्वोपगमात् एतेन सपापस्तुलां नारोहेदित्यादिपरीक्षाविधयोपि
व्याख्याताः तत्रापि धातोरारोहणहेतुदृष्टलक्षकत्वादतएव जयेतर
निमित्तस्य वृत्तिलाभाय केवलम् । परीक्ष्यसमवेतस्य परीक्षा
विधयो मताइत्याचार्य्यैरप्युक्तमिति वदन्ति । परे तु साध्यताविशिष्टमिष्टमेव विध्यर्थः तत्राप्येवकारस्थलइव नियतोत्तरवर्त्तितावच्छेदकधर्म्मवत्तालक्षणसाध्यताघटकप्रत्येकवस्तुन्येव लिङादेः शक्तिः
विशिष्टन्तु वाक्यार्थमर्य्यादया लभ्यं अतः सामान्यतो नियतोत्तरवर्त्ति
त्वस्य दुर्वचत्वेऽपि न क्षतिः एवञ्च स्वर्गकामो यागानुकूलकृतिमान्
यागसाध्येष्टवांश्च इत्याकारकएव स्वर्गकामो यजेतेत्यादौ बोधः तेन
भावनायाः प्रथमान्तार्थान्वयित्वनियमः सम्पद्यते सम्पद्यते च शास्त्र
देशितं फलमनुष्ठातरीत्यादिकः प्रवादः यागादौ स्वर्गादिसाधनत्वस्य
विधिबोध्यत्वे तु तदुभयमेव व्याकुलीभवेत् फलं प्रति कर्त्तुरौदासीन्याद्भावनाविरहाच्च । धात्वर्थावच्छिन्नतिङर्थस्यैव तथात्वादिति ।
नचैवं पितृस्वर्गकामो गयायां पिण्डं दद्यादित्यादिविधेर्बाधः तत्र स्वाश्रयपितृकत्वादिपरम्परासम्बन्धेनैव पिण्डदानजन्येष्टस्य कर्त्तर्य्यन्वयात
इतरगतत्वे प्रमाणासत्त्वस्थलएव साक्षात्सम्बन्धेन कर्त्तरि तदन्वयस्य
व्युत्पन्नत्वात् यद्यपीष्टं परित्यज्य साध्यमात्रं विध्यर्थोऽस्तु स्वर्गकामादि
समभिव्याहारादेव यागसाध्यत्वेन स्वर्गादेर्भानसम्भवात् विश्वजितो

यजेत राजन्य इत्यत्रापि विश्वजिद्यागसाध्यवान् क्षत्रियः इत्यन्वयबोधोत्तरं साध्यविशेषाकाङ्क्षयैव स्वर्गस्य तथात्वेन कल्पनात् तथापि तृप्तिकामो अश्वं न ताडयेदित्यादौ तृप्तिकामादे र्जलताडनसाध्यसामान्याभावस्य बोधने बाधादिष्टत्वेन तदवान्तरस्वर्गत्वादिना वान्वयबोधस्यानुभविकत्वाच्च ताद्रूप्येण शक्तिरन्यथेष्टमात्रं शक्यं स्वसाध्यत्वसंसर्गेण धात्वर्थस्य तत्रान्वयात् विशिष्टार्थलाभ इत्यत्र किं न रोचयेः अतएव इष्टत्वेन फलस्य शक्यत्वे ज्ञेयत्वादिप्रकारेणापि तथात्वापत्तिर्विनिगमकाभावादित्यपि प्रत्युक्तमिति प्राहुः । प्राभाकरास्तु स्वर्गकामो यजेतेत्यादौ यागःस्वर्गकामस्य कृतिसाध्यतावान् इत्याकारकः प्रथमं न बोधः तत्कामकार्य्यत्वस्यान्वये प्रयोजकस्य तत्साधनतया ज्ञातत्वस्य तत्साधनत्वस्य वा पूर्व्वं यागेऽगृहीतत्वात् साक्षात्स्वर्गसाधनत्वस्य तत्रासत्त्वात् स्वर्गपर्य्यन्तस्थायिस्वव्यापारवत्त्वस्य तादृशव्यापारानुपस्थित्या ग्रहासम्भवात् स्वर्गकामः पचेतेत्यादावप्रामाण्यानुरोधेन उक्तरीत्या योग्यताधियः कारणत्वस्यावश्यकत्वात् नित्यस्य कर्म्मणः फलाभावेन प्रत्यहं शुचिः सन्ध्यामुपासीतेत्यादिविधेरप्रामाण्यभिया इष्टसाधनत्वस्य विध्यर्थत्वाभावात् अतएव स्वर्गकाम नियोज्यताको नियोज्यतासम्बन्धेन स्वर्गकामीयो वा यागः कार्य्यतावान् इत्यपि नादिमो बोधः स्वर्गकामस्य नियोज्यत्वं हि न तत्कृतिसाध्यत्वं स्वर्गकामकार्य्यताविशिष्टे यागे लिङर्थकार्य्यत्वस्यान्वये निराकाङ्क्षत्वापत्तेः नापि तदीयकृतिसाध्यत्वधीविशेष्यत्वं स्वर्गकामः पचेतेत्यादेः प्रमाणतापत्तेः परन्तु स्वर्गकामनिष्ठस्य स्वर्गसाधनताधीजन्यकार्य्यताज्ञानस्य विशेष्यत्वं तदन्वयप्रयोजकञ्च स्वर्गसाधनत्वं साक्षादसाधनस्य यागादेः स्वर्गपर्य्यन्तस्थायिव्यापारानुपस्थित्या परम्परासम्बन्धेन साधनत्वाग्रहेण प्रथमं दुर्ग्रहमेवेति तस्मात् कार्य्यएव लिङः शक्तिरतस्तत्रैव धात्वर्थयागस्य स्वर्गकामनियोज्यकत्वस्य च युगपदन्वयात् यागस्य कार्य्यं स्वर्ग

कामनियोज्यताकं स्वर्गकामकृतिसाध्यं वेत्याकारकएव प्रथमं बोधः।
स्वर्गकामनियोज्यताद्यन्वयप्रयोजकस्य साक्षात्स्वर्गसाधनत्वस्यैव शची
सम्पर्कादिके कार्य्ये पूर्व्वं गृहीतत्वात् उत्तरकालन्तु यागकार्य्यस्य स्वर्ग
कामकृतिसाध्यत्वं स्वर्गकामनियोज्यताकत्वं वा यागस्य तथात्वं विना-
नुपपन्नमित्यनुपपत्तिधीसहकृतादुक्तवाक्यात् यागः स्वर्गकामस्य कृति
साध्यइत्याकारकः स्वर्गकामनियोज्यताको यागः कृतिसाध्यइत्याका-
रको वा प्रवृत्त्योपयिकश्चापादानिको बोधः स्वर्गाव्यवहितप्राक्काल
वृत्तिस्वव्यापारस्य पूर्व्वमुपस्थित्या स्वर्गकामनियोज्यताद्यन्वयप्रयोज-
कस्य स्वर्गसाधनत्वस्य यागे सुग्रहत्वात् नच तृप्तिकामो भुञ्जीतेत्यादि
लौकिकस्थले लघुनि कार्य्यत्वे शक्तस्य लिङादेः स्वर्गकामो यजेतेत्याद्य
लौकिकस्थले कार्य्यत्वविशिष्टे लक्षणैवास्तु तावतैव स्वर्गकामनियोज्यता-
न्वययोग्यतासम्पत्तेरिति वाच्यं तथासति अपूर्व्वस्य ताद्रूप्येण विध्यनु-
भाव्यत्वानुपपत्तेः कार्य्यत्वावच्छिन्नशक्तत्वेन पदज्ञानस्य तदवच्छिन्नानु-
भावकत्वात्। नचैवं गङ्गायां घोषो दृश्यतामित्यादौ लक्ष्यस्य तीरादे
रन्वयधीविषयत्वं न स्यादिष्टत्वात्। शक्तपदान्तरस्यैव तत्रोपस्थित
तीरादिसाकाङ्क्षस्वशक्यार्थानुभावकत्वात् पाकं करोतीत्यादिप्रत्यक्षे
पाकादेरिव तत्रापि तीरादेस्तटस्थज्ञानविषयत्वेनैव विशेषणत्वात्
अतएव न तावद्विशिष्टधीविषयस्यैव विशेषणत्वं क्वचित्तदभिनिवेशस्तु
सामग्रीवशादित्याचार्य्यैरप्युक्तं लौकिकलिङः क्रियायां कार्य्यत्वानु-
भावकत्वे तु तादृशलिङ्त्वावच्छेदेन कार्य्यत्वे शक्त्यन्तरं वाच्यं नोचे-
त्तत्रापि उक्तैव गतिः अतएव लोके लिङ् लाक्षणिकीति गुरूणां
सिद्धान्तः सङ्गच्छते इत्याहुः तच्चिन्त्यं इष्टसाधनत्वस्य विध्यर्थत्वादेव
स्वर्गकामः पचेतेत्यादेरप्रामाण्यसम्पत्तावुक्तक्रमेण यागादौ स्वर्गकाम
कृतिसाध्यत्वस्य तत्कामनियोज्यताकत्वस्य वान्वये स्वर्गसाधनत्वादेः
प्रयोजकत्वे मानाभावात् प्रत्यहं सन्ध्यामुपासीतेत्यादिनित्यविधेरपि

सन्ध्यामुपासते ये तु इत्यर्थवादेनोपस्थितब्रह्मलोकप्राप्त्यादिसाधनतावाचित्वात् विधिशेषीभूतार्थवादस्य गुरुणापि प्रामाण्योपगमात् नच नित्यकर्म्मणां काम्यत्वे नित्यत्वविरोधः नहि फलकामनां विना क्रियमाणत्वं नित्यत्वमप्रसिद्धेः प्रवृत्तिसामान्यं प्रत्येव काम्यसाधनताधियः कारणत्वात् किन्तु यदकरणात् प्रत्यवायस्तत्त्वं तच्च काम्यत्वेऽप्यविरुद्धं नियोज्यान्वयस्य प्रामाणिकत्वेऽपि साक्षात्परम्परासाधारणस्वर्गसाधनतामात्रस्य तद्बोध्यताविधया प्रागेव यागादौ सुग्रहत्वाच्च स्वर्गादिनियतपूर्ववर्त्तित्वावच्छिन्नसम्बन्धवत्ताकान्यथासिद्धत्वनिरूपकधर्म्मवत्तारूपस्यातिरिक्तरूपस्य वा सामान्यतः स्वर्गसाधनत्वस्य व्यापारत्वाद्यघटितत्वेन तद्बुद्धे बाधकाभावादित्येषा दिक्। श्राद्धे भुञ्जीत भवान् इह भुञ्जीथास्त्वमित्यादौ श्राद्धे भोजनाय निमन्त्रितो भवानित्यनुभवात् निमन्त्रितत्वमेव तत्र लिङर्थः। तच्च स्वकर्त्तव्यत्वप्रकारकधीजनकवाक्यप्रतिपाद्यत्वं तदेकदेश एव च कर्त्तव्यत्वबोधे धात्वर्थो विशेष्यत्वेनान्वेति तथाच श्राद्धभोजनधर्म्मिकस्वकर्त्तव्यत्वधीजनकवाक्यप्रतिपाद्यो भवानित्याकारस्तत्र बोधः तादृशधीजनकस्य भवताच भोक्तव्यमित्यादिवाक्यस्य निमन्त्रणरूपतया भवदादेस्तत्प्रतिपाद्यत्वात् स्वपदस्य निरुक्तप्रतिपाद्यत्वाभिमतभवदादिपरत्वात् तत्र च यस्य प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणमिति वृद्धस्मरणात् निरुक्तधीजनकवाक्यमप्रत्याख्येयत्वेन विशेषणीयं तच्च प्रत्यवायजनकप्रत्याख्यानकत्वं श्राद्धमुपक्रम्य अनिन्दितेनामन्त्रितो नापगच्छेदिति श्रुतेः एवञ्च पुत्रोत्सवे भवान् भुञ्जीतेत्यादौ न निमन्त्रितत्वं लिङर्थः तत्प्रत्याख्याने प्रत्यवायाश्रुतेः किन्त्वामन्त्रितत्वमेव तच्च स्वकर्त्तव्यत्वप्रकारकधीजनकप्रत्याख्यानार्हवाक्यप्रतिपाद्यत्वं प्रत्याख्यानार्हत्वञ्च प्रत्यवायाजनकप्रत्याख्यानकत्वं यत्प्रत्याख्याने कामचारस्तदामन्त्रणमिति स्मृतेः वासं युद्धात्तारयेत्वं जलाद्विप्रं समुद्धरेरित्यादावप्युक्तरीत्यैवान्वयो द्रष्टव्यः।

धेनुं दद्यास्त्वमस्मभ्यमित्यत्र प्रार्थना लिङर्थः तच्च स्वसम्प्रदानकदान
धर्म्मिकसम्बोध्यकर्त्तव्यत्वप्रकारकवक्तृच्छाविषयत्वं तेन मैत्रवक्तृक-
तादृशवाक्यस्थले धेनुकर्म्मकमैत्रसम्प्रदानकदानत्वावच्छिन्नधर्म्मिका या
युष्मत्कर्त्तव्यत्वप्रकारिका मैत्रेच्छा तद्विषयीभूतस्य दानस्यानुकूल
कृतिमांस्त्वमित्याकारकस्तत्र बोधः। भिक्षां देहि त्वमर्थिभ्य इत्यादौ
क्वचिल्लोटोऽपि निरुक्तप्रार्थनार्थः तत्रच भिक्षा भिक्षणीयं कृदिहित
इति न्यायात्। ह्रदो यदि धूमवान् स्यादित्यादौ धातोर्निरूढलक्ष-
णया भेदोऽर्थस्तदुत्तरलिङस्त्वाश्रयत्वं यदि शब्दस्तु लक्षणायां निरू-
ढत्वसम्पत्तये तेन धूमवद्भेदाश्रयतावान् ह्रद इत्यर्थः धूमवान्नेत्यत्र
निपातार्थ इव धात्वर्थेऽपि भेदे प्रतियोगित्वसम्बन्धेन नामार्थस्य धूम-
वदादेः क्वचित् व्युत्पत्तिवैचित्र्येणान्वये क्षत्यभावात् ह्रदो यदि धूम-
वानित्यादौ तु यद्यादिनिपातस्यैव भेदादिरर्थः इत्यस्य ह्रदो यदि
धूमवान् स्यात् वह्निमान् स्यात् इत्यत्रापि धूमवद्भिन्नो ह्रदो धूमव्या-
पकवह्निमद्भेदवानित्याकारकस्तत्र बोधः स वह्निमान् यो धूमवानि-
त्यादौ यो धूमवान् स वह्निमानित्यादौ च यद्योगप्राथम्यादिवशादिव
प्रकृतेपि स्याद्योगप्राथम्यादिवशात् धूमादिव्यापकतया वह्न्यादेर्भान
सम्भवात् अतएव ह्रदो यदि धूमवान् स्यात् घटवान् स्यादित्यादिको
न प्रयोगः घटादेर्धूमाद्यव्यापकत्वात् ह्रदो यदि धूमवान् स्यात् यदि
घटवान् स्यादित्यर्थे तु तादृशप्रयोगो योग्य एव धूमस्योद्देश्यकुक्षाव
निक्षेपात्। यद्योगः प्राथम्यञ्च प्रत्येकमेव व्यापकताग्राहे तन्त्रं नतु
यद्योगस्य प्राथम्यम्। स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षित
इत्यादौ न षट्पदोऽसौ न जुगुञ्ज यः कलं इत्यादौ च विनापि यद्योग
प्राथम्यं तन्मात्रादेव शौर्य्यादौ त्वद्वीक्षितत्वादिव्यापकत्वग्रहात् गुण
त्वं यदि घटे स्यात् द्रव्ये स्यादित्यादौ तु धातोरत्यन्ताभाव एवार्थः
तदुत्तरलिङस्तु पूर्व्ववदाश्रयत्वं तथाच घटवृत्तित्वाभाववद्गुणत्वं

घटवृत्तित्वव्यापकीभूतस्य द्रव्यवृत्तित्वस्याभाववदित्येवं तत्र बोधः। परे तु ह्रदो यदि धूमवान् स्यात् वह्निमान् स्यादित्यादौ तु प्रथमस्य स्याच्छब्दस्यापादकत्वं द्वितीयस्य चापत्तिरर्थः तेन धूमवत्तापादकतावह्निमत्तापत्तिविशेष्यो ह्रद इत्याकारकस्तत्र बोधः। यदिशब्दस्तु तादृशार्थतात्पर्य्यग्राहकः। यद्ययं धूमवान् वह्निमानपि स्यादित्यादौ तु यदिशब्दस्यैवापादकत्वमर्थः इत्याहुः। यो ब्राह्मणायावगुरेत् तं शतेन यातयादित्यादौ च हेतुहेतुमतोर्लिङ् इत्यनुशासनात् यः शतयातनाहेतुब्राह्मणावगोरणवान् तदीयशतयातनं ब्राह्मणावगोरणजन्यं इत्याकारकोबोधः ब्राह्मणावगोरणं हन्तुमुद्यमः पौर्व्वापर्य्यमात्रं तत्र लिङर्थः न हेतुहेतुमद्भावः पश्चात्तस्य कल्पनात् अन्यथा दुरितापूर्व्वस्य वाच्यत्वापत्तेरिति तु प्राभाकराः। यद्ब्राह्म पातयेत् पिण्डं तं नयेद्ब्रह्म शाश्वतमित्यादावप्युक्तरीत्याऽन्वयः।

ऋतौ स्वदारानुपेयादित्यादौ च स्मृतौ न स्वदारगमनादेरिष्टसाधनत्वे विधेस्तात्पर्य्यं दारगमनादे लौकिकप्रमाणावगतेष्टसाधनताकत्वेन विधेयत्वात् प्रमाणान्तराप्राप्तप्रापकस्यैव श्रौतविधित्वात् किन्त्वयोगव्यवच्छेदपर्य्यवसिते नियमे सच प्रत्यवायजनकीभूताभाव प्रतियोगित्वरूप स्तदेकदेशस्वाभावे ऋत्वादिकालस्य वच्छेदकत्वेनान्वयात् ऋतुकालावच्छेद्यत्वविशिष्टस्य प्रत्यवायजनकीभूताभावस्य प्रति योगि स्वदारगमनमित्याकारकस्तत्र बोधः। यद्वा प्रत्यवायहेतुत्व मभावश्च द्वयं तत्र लिङर्थस्तेन प्रतियोगिविधया धात्वर्थस्यावच्छेद्यत्वेन च कालस्यान्वयिन्यभावे लिङा प्रत्यवायहेतुत्वस्य बोधनात् ऋतु कालावच्छेद्यः स्वदारगमनाभावः प्रत्यवायहेतुरित्याकारएव तत्र बोधः। नच बहूनां दाराणां गमनमलीकं तेषामृतावगमने प्रत्यवायो न स्यात् उक्तावाच्यादलाभादिति वाच्यं स्वदारपदस्य स्वदार भिन्नायः स्वसमानकालीन स्वदन्यस्त्रीपरतया उक्तस्त्वेव तत्र स्वदार

ऋतुकालावच्छेदस्य स्वदारभिन्नस्वसमानकालीनेतरस्त्रीगमनाभावस्य प्रत्यवायहेतुत्वबोधनात् स्वासमानकालीनस्त्रीगमनएव तादृशगमनत्वस्य सुप्रसिद्धत्वात् एतेन श्राद्धदिने पितृशेषं भुञ्जीतेत्यादिकोऽपि नियमविधिर्व्याख्यातः । पञ्च पञ्चनखान् भुञ्जीतेत्यादिलिङोऽपि नेष्टसाधनत्वे तात्पर्य्यं भोजनस्य रागप्राप्तत्वेनाविधेयत्वात् नापि प्रागुक्तनियमे पञ्चनखानामपञ्चानामभोजनस्य प्रत्यवायहेतुत्वे मानाभावात् ऋतावुपेयात् स्वां भार्य्यामन्यथा भ्रूणहा भवेदित्यादिनिन्दार्थवादबलात् ऋतौ स्वदारगमनाद्यभावस्य दुरितहेतुत्वव्यवस्थित्यैव तद्विधेर्नियमपरत्वकल्पनात् किन्त्वन्ययोगव्यवच्छेदपर्य्यवसन्नायां परिसंख्यायां सा च यद्यपि न शशादिपञ्चविधान् पञ्चनखानेव भुञ्जीतेत्याकारापञ्चनखभिन्नस्य ओदनादेर्भोजनस्य निषिद्धत्वे प्रमाणाभावात्तथापि पञ्चैव पञ्चनखान् भुञ्जीतेत्याकारा तेन शशादिपञ्चभिन्नानां पञ्चनखानां भोजनं प्रत्यवायहेतुरित्येव तत्र वाक्यार्थ इति तत्रत्यलिङा प्रत्यवायहेतुत्वमात्रं प्रत्याय्यते प्राथमिकपञ्चपदस्य लक्षणया शशादिपञ्चभिन्नार्थकत्वात् । ननूक्तलिङः परिसंख्यया पञ्चविधान्यपञ्चनखानां भोजनस्य प्रत्यवायहेतुत्वबोधने पञ्चपदस्य लक्षणापत्तिरतः शशादिपञ्चपञ्चनखानां भोजनाभावस्यैव प्रत्यवायहेतुत्वं बोधयन्नियमविधिरेवायमुचितः भोजनतदभावयोरेकस्यापि प्रमाणान्तरेण प्रत्यवायहेतुत्वस्याक्लृप्तत्वादिति चेन्न प्रोक्तविधेर्नियमपरत्वे पञ्चनखपदस्य व्यर्थत्वापत्तेः शशादिपञ्च भुञ्जीत इत्यतएव पञ्चभोजनाभावस्य प्रत्यवायहेतुत्वस्यावगतेः सम्भवात् । श्वाविधं शल्लकं गोधां खड्गकूर्म्मशशांस्तथा । भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रां श्चैकतोदतः इतिमनुवचने पञ्चनखेष्विति निर्द्धारणसप्तम्या शल्लकादिपञ्चभिन्नपञ्चनखानां भक्षणस्य प्रत्यवायहेतुतायाः क्लृप्तत्वाच्च श्वाविधमित्यस्य शल्लकविशेषणत्वात् एवञ्च वाक्-

नाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादावपि लिङः परिसंख्यैवार्थ
स्तेन याजनादिभिन्ने ब्राह्मणस्य धनार्ज्जनं प्रत्यवायहेतुरिति वाक्यार्थः
न कृष्याद्यैरनापन्नो ब्राह्मणो धनमर्ज्जयेत्यादिवचनै रुपायान्तरेण
विप्राणां धनार्ज्जनस्य प्रत्यवायहेतुत्वस्य स्फुटत्वात् नतु याजनाद्यैः
ब्राह्मणो धनमर्जयेदेव इति नियमविधिर्याजनादिना धनानर्जने
ब्राह्मणस्य प्रत्यवायाश्रुतेः ।

लङं लक्षयति ।

या स्मयोगं विना धातोः शपन्तस्यार्थधर्म्मिके ।
अतीतत्वग्रहे हेतुस्तादृशी तिङ् लङुच्यते ।

स्मशब्दस्य योगं विना शपन्तस्य धातोरर्थेऽतीतत्वस्यान्वयधीहेतु
र्यादृशी तिङ् तादृशी तिङ् लङ् उच्यते शिवादिभ्यस्तथैव स्यादित्यत्रैव
नकारादिलकारनित्यत्वं लङोच्यते इति वा पाठः तिवादिस्तु स्मशब्दोप-
सन्धानं विना धातोरर्थे नातीतत्वं बोधयति पपाचेत्यादौ लिडादिर्बोध
यन्नपि न शपन्तस्यापचदित्यादौ तु विनापि स्मशब्दयोगं लङस्तथात्वम्
अदीव्यदित्यादौ शपन्तस्य धातोरर्थे स्वार्थमबोधयन्नपि दिवादिस्तत्
सजातीय एव तण्डुलमपचत् इत्यादावमोनिरुक्तसजातीयत्वेऽपि न
तिङ्त्वमतस्तद्व्युदासः प्रकृत्यर्थेऽनुमतत्वाद्यतनत्वाद्यनाकाङ्क्षितत्वेन विशे
षणाच्च पच्यतां पच्येतां पचतामित्यादावपाक्तां अपच्यातां अपाक्ता
मित्यादौ च लोटोऽलङ्लुङस्तामातांप्रभृतौ न प्रसङ्गः । अत्रापच-
दित्यादौ लङोऽतीतः काल इव तद्भिन्नं ह्यस्तनत्वमप्यर्थः तच्च पूर्व्वदिन
वृत्तित्वमिति कौमाराः ह्यस्तनत्वं लङो नार्थः किन्त्वद्यतनभिन्नत्वं
अनद्यतने लङिति पाणिन्यनुशिष्टेरित्यपरे । तथा च वर्त्तमानध्वंस
प्रतियोगिपूर्व्वदिनवृत्तिपाककृतिमान् तादृशप्रतियोग्यनद्यतनकाल
वृत्तिपाककृतिमान् इति वा तत्र बोधः । प्रायिकञ्चेदं तेन ह्यस्तन-
त्वादिशून्येऽपि काले कपिलकादेः प्रयोगः । सोऽपचदित्यादौ ह्यः-

पदाख्याताभ्यामेकमेव निरुक्तं श्वस्तनत्वं बोध्यते समभिव्याहारात् अन्यथा पक्ता पचतीत्यनेन निराकाङ्क्षतापत्तेः।

लुङं लक्षयति।

हन्तेः कृतवधेरर्थे यातीतत्वस्य बोधिका।
सिजन्तस्याथवा धातोस्तादृशी तिङ् लुङोच्यते।

कृतवधादेशस्य हन्तेरर्थे किम्वा सिजन्तस्य धातोरर्थे यातीतत्वस्य बोधिका तादृशी तिङ् लुङा लुङ्शब्देनोच्यते। जघान हन्तिस्म इत्यादौ लिङ्लङादिको हन्तेरर्थेऽतीतत्वस्य बोधकोऽपि न कृतवधादेशस्य नवा सिजन्तस्य अवधीत् अवधिष्टां अवधिषुरित्यादौ तु लुङ्मात्रं तथा वध्यात् वध्यास्तां वध्यासुरित्यादौ कृतवधादेशस्य तस्यार्थे स्वार्थानुभाविकापि आशीर्नातीतत्वस्य बोधिका। अत्राप्यनुमतत्वह्यस्तनत्वाद्यनाकाङ्क्षितत्वेन विशेषणात् पचतां अपचत् अपचतामित्यादौ लोडाद्यतिप्रसङ्गः अपाक्षीदित्यादौ अतीतः काल इव सन्निकृष्टमद्यतनत्वमपि लुङामर्थस्तेन वर्त्तमानध्वंसप्रतियोग्यद्यतनपाककृतिमान् इत्येवं तत्र बोधः। रीतिरत्रैव।

लिटं लक्षयति।

द्विरुक्तभिन्नधात्वर्थे स्वार्थस्यान्वयबोधने।
या न योग्या तादृशी तिङ् लिट्पदेनाभिधीयते।

अशिश्रियत् अदुद्रुवदित्यादौ द्विरुक्तस्यैव अपाक्षीदित्यादौ तदन्यस्यापि धातोरर्थे स्वार्थान्वयं लुङादयो बोधयन्ति लिटस्तु जघान जघ्नतुरित्यादौ द्विरुक्तस्यैव धातोरर्थे पिपक्षति पापच्यते इत्यादौ सनादयस्तादृशा अपि न तिङः तत्रापि प्रकृत्यर्थे वर्त्तमानत्वाद्यनाकाङ्क्षत्वेन विशेषणात् पचे पचावहे पचावह इत्यादौ न लडाद्यतिप्रसङ्गः।

कासाद्यके लोलूयामास ईक्षाम्बभूव इत्यादावाम इव कृञादेरप्यनुप्रयुक्तस्य पदसाधुतामात्रत्वादसम्भवापत्तेरन्यथा निर्व्वक्ति।

द्विरुक्तस्य यजेरर्थे चकास्तेराम्युतस्य वा।
या स्वार्थस्यान्वये हेतुः सा वा लिट् कथ्यते बुधैः।

जुहोतीत्यादौ द्विरुक्तस्य धातोरर्थे स्वार्थबोधकोऽपि लडादि र्न यजेरर्थे। चकास्तीत्यादौ चकासधातोरर्थे तादृगपि नामन्तस्य ममश्चचाल सुरभिमासश्चाजगामेत्यादावतीतः कालइव धात्वर्थनिष्ठं परोक्षत्वमपि लिटोऽर्थः तच्चातीन्द्रियत्वं तेनातीतकालवृत्त्यतीन्द्रिय चलनवन्मन इत्याकारकस्तत्र बोधः। चैत्रस्तत्र पपाचेत्यादौ तु लिडुपस्थाप्यस्यापि परोक्षत्वस्य न पाकादावन्वयोऽयोग्यत्वात्। एतेन शातेने किरणावलीमुदयन इत्यादि व्याख्यातम् शेषं पूर्ववत्।

लुटं आशीर्लिङञ्च क्रमेण लक्षयति।

धात्वर्थे श्वस्तनत्वस्य बोधिका तिङ् लुडुच्यते।
आशीर्लिङाशंसनस्य भावित्वस्य च बोधिका।

श्वः पक्ष्यतीत्यादौ धात्वर्थे श्वस्तनत्वस्य बोधकमपि श्वःपदं न तिङ् लृडादयस्तु धात्वर्थे भावित्वमेव बोधयन्ति न श्वस्तनत्वमपि जीवतुभवानित्यादौ तु तुबादिकं आशंसनीयत्वस्य बोधकमपि न भावित्वस्य भावित्वस्य बोधकोऽपि लृडादि नाशंसनीयत्वस्य भूयात् भूयास्तामित्यादौ पुनरस्मादशेवाशीर्लिङः प्रकृत्यर्थस्याशंसां भावित्वञ्चानुभावयन्ति। अथ पाकगोचरैककृतिदशायामपि तद्गोचरापरकृतेरतीतत्वाद्भविष्यत्वाच्च तदानीमयं पपाच पक्ष्यतीत्यादिप्रयोग प्रसङ्गः पाककृतित्वावच्छेदेनातीतत्वादेरन्वयोपगमेन तदारम्भे तु पपाच पक्ष्यतीत्यादेरयोग्यत्वापत्तिः एतदवच्छेदेनातीतत्वभविष्यत्वयो-र्बाधादिति चेत् न पाककृतित्वावच्छिन्नधर्म्मिकायां तत्तत्पाकगोचर कृतित्वावच्छेद्यस्वरूपसम्बन्धेनैवातीतत्वाद्यन्वयबुद्धौ पाकार्थकधातूत्तर लिटत्वादिना हेतुतयैव उक्तदोषव्युदासात् चुल्लीस्थाल्यारोपणादिकं हि न प्रत्येकं पाकपदार्थः किन्तु स्थाल्यारोपणाभिनिवेशनतुषप्रक्षेपा-

दानुप्रस्फोटनपर्य्यन्त त्तत्तत्क्रियाकलाप एव। यदाह दुर्गः क्रियते इति क्रिया साच पूर्व्वापरीभूतावयवैवेति तथाच तावत्क्रियाकलापस्य प्रत्येकगोचरकृतेरतीतत्वभविष्यत्वयोर्बाधात् अवान्तरतुषप्रक्षेपादिदशायां पपाच पक्ष्यतीत्यादिको न प्रयोगः। नचैवं सूपपाकं निष्पाद्य तण्डुलं पचत्यपि पुंसि अयं पपाच इति स्यात् निष्पन्नपाकगोचरयावत्कृतेरतीतत्वात् इति वाच्यमिष्टत्वात् तण्डुलं पपाचेत्यादिप्रयोगस्यैव तत्रायोग्यत्वात् अन्यथा सूपमपाक्षीदित्यादिप्रयोग स्तत्र कथं स्यात्। अतएव सम्प्रति सूपं पचत्यपि पुरुषे सूपकर्म्मकनिष्पन्नपाकगोचरकृतित्वावच्छेदेनातीतत्वमुपादाय सूपमपाक्षीदित्यादिकः प्रयोगो भवत्येव परन्त्वद्य सूपमपाक्षीदित्यादिरेव न तत्र प्रयोगः सूपकर्म्मकाद्यतनपाकगोचरकृतित्वावच्छेदेन अतीतत्वस्य बाधादिति युक्तमुत्पश्यामः।

लृटं लृङञ्च लक्षयति।

क्रियातिपाते कालस्य भाविनः प्राक्तनस्य च।

वैशिष्ट्यबोधिका या तिङ् लृट् च लृङ् च क्रमादिमे।

या तिङ् क्रियाया धात्वर्थस्यातिपाते विगमे भाविकालावच्छेद्यत्वस्य बोधिका तादृशी लृट् यात्वतीतकालावच्छेद्यत्वस्य तादृशी लृङ् तण्डुलश्चेत् प्राप्स्यत्योदनमपि पक्ष्यति चैत्रइत्यादौ स्यतिप्रभृतयश्चेत्यादेर्भाविकालावच्छेदेन तण्डुलप्राप्त्याद्यभाववत्त्वमनुभावयन्ति तथैव चेदप्राप्स्यत् ओदनमप्यपक्ष्यत् इत्यादावतीतकालावच्छेद्यमिन्धनप्राप्त्यभाववत्त्वं तथाच भाव्यतीतकालाविव क्रियाप्रतियोगिकोऽभावोऽपि तयोरर्थः वस्तुतोभाव्यादिकालावच्छेदेन तण्डुलप्राप्त्यभावप्रयुक्त ओदनपाकाद्यभावएव उक्तस्थले लृङादिना चैत्रादावनुभाव्यः क्रियाविरहप्रयुक्तस्य क्रियान्तरविरहस्यैव क्रियातिपातत्वात् अतएव चैत्र चेदप्रतिष्ठन् ग्राममप्यगमिष्यदित्यादिको न प्रयोगः तीर्थञ्चेद-

गमिष्यत् सार्थमप्यगमिष्यतइत्यादिकन्तु चिन्त्यः सार्थगाभावाभावस्य तीर्थगत्याद्यभावाप्रयुक्तत्वात् इति तच्चुच्छेत् पचेदोदनमपि भुञ्जीतेत्यादौ तु क्रियातिपतनस्य वर्त्तमानत्वमेव लिङा प्रत्याय्यते न तु भावित्वमतीतत्वं वेति तद्युदासः ।

क्रमप्राप्तं धात्वंशप्रत्ययं लक्षयति ।

सुबर्थानन्वितस्वार्थतिङन्यप्रत्ययस्तु यः ।
स धात्वंशोऽथवा धातोरन्तांशप्रत्ययस्तथा ।

सुबर्थानन्वितयादृशस्वार्थको यस्तिङन्यः प्रत्ययः स तादृशार्थे धात्वंशप्रत्ययः पुत्रीयतीत्यादौ क्यजाद्यर्थस्य इच्छादे र्न सुबर्थेऽन्वयः किन्तु तिङर्थे पचतीत्यादौ सुबर्थानन्वितकृत्यर्थकोऽपि तिबादिर्न तिङन्यः पिपक्षया कुरुतेत्यादौ तु भावकृत्सम्भ्यस्य इच्छास्वरूपस्यैव सुबर्थकरणत्वादावन्वयः न तु सनन्तार्थपाकेच्छामात्रस्य अस्तु वा सान्वयसंज्ञानुरोधेन धात्वन्तावयवरूपएव प्रत्ययो धात्वंशप्रत्ययः पिपक्षादिधात्वन्तभागत्वात् सनादिप्रत्ययस्य ।

विभजते ।

नामप्रकृतिकश्चायं धातुप्रकृतिकस्तथा ।
तत्रादिमः क्यच्क्यङादिरपरः सन्यङादिकः ।

अयं धात्वंशप्रत्ययो नामप्रकृतिको धातुप्रकृतिकश्चेति द्विविधः । तत्रादिमोनामप्रकृतिकः क्यच्क्यङादिः अपरोधातुप्रकृतिकः सन्यङादिः चैत्रः पुत्रीयति इत्यत्र क्यजर्थेच्छायां तत्प्रकृत्यर्थतावच्छेदकीभूतपुत्रत्वाद्यवच्छिन्नविषयतया प्रकृत्यर्थस्य पुत्रादेस्तस्याश्च तिङर्थस्याश्रयत्वे निरूपकत्वेनान्वये साकाङ्क्षत्वात् पुत्रत्वेन पुत्रगोचरेच्छाया आश्रयत्ववांश्चैत्रइत्येवमन्वयधीः अतएव मनुष्यत्वादिप्रकारेण पुत्रेच्छादशायां पुत्रीयतीत्यादिको न प्रयोगः किन्तु मानुषीयतीत्यादिरेव । अतएवात्मनः पुत्रीयतीत्यादेरात्मपुत्रत्वप्रका-

रकेच्छाबोधनएवासामर्थ्यम् । आत्मपुत्रत्वादेस्तत्र प्रत्ययार्थतानव-च्छेदकत्वात् आत्मसम्बन्धी यः पुत्रः पुत्रत्वेन तद्गोचरेच्छाया बोधने तु तस्य सामर्थ्यमेव चैत्रस्य गुरुकुलमित्यादाविव वृत्तिशब्दैकदेशे-ऽपि पुत्रादावात्मप्रभृतेः प्रतियोगिविधयान्वयस्य व्युत्पन्नत्वात् । आत्म-पुत्रीयतीत्यादौ पुनरात्मपुत्रत्वादेरपि प्रत्ययार्थतावच्छेदकत्वात् तदव-च्छिन्नपुत्रविषयताकेच्छाबोधने न किमपि बाधकं पश्यामः । एतेन पुत्रकाम्यतीदंकाम्यतीत्यादौ काम्यस्याप्यर्थो व्याख्यातः । पुत्रीयति माणवकमित्यादौ तु आचारसदृशाचारः क्यजर्थस्तद्विशेषणीभूते आचारे प्रकृत्यर्थस्य विशेष्यीभूते च माणवकादेः कर्म्मत्वेनान्वयः तेन पुत्रकर्म्मकाचरणसदृशं यन्माणवककर्म्मकाचरणं तदनुकूलकृतिमानि-त्याकारकस्तत्र बोधः । पुत्रकर्म्मकाचरणञ्चेहान्नपानादिना संवर्द्धन-तोषणादि । सर्पीयति शत्रुमित्यादौ सर्पकर्म्मकाचरणतुल्यं यच्छत्रु-कर्म्मकाचरणं तदनुकूलकृतिमानित्यर्थः सर्पकर्म्मकाचरणञ्चात्र सर्प-कर्म्मकताड़नमारणादि ग्राह्यम् । प्रासादे कुटीयतीत्यस्य कुट्यधि-करणकाचारसदृशो यः प्रासादाधिकरणकाचारस्तदनुकूलकृतिमानि-त्यर्थः कुट्यधिकरणकाचारश्चेह कुट्यधिकरणकशयनादिरूपो द्रष्टव्यः । कर्म्माधिकरणयोरेव सदृशाचारे क्यचोविधानात् वल्किणइवाचरति धूलिर्दण्डेनेवाचरति चक्रेणेत्याद्यर्थे धूलिर्व्वल्किणीयति चक्रेण दण्डी-यतीत्यादिकः कर्त्तृकरणादेः सदृशाचारे अप्रयोगः । मान्ताव्य-याभ्यां न स्यादित्यनुशिष्टेरिदमिच्छति स्वरिच्छति इत्याद्यर्थे इदमिवा-चरतीत्याद्यर्थे च न क्यच् । गव्यति नाव्यतीत्यादावपि गामिच्छति गामिवाचरति इत्यादिरर्थः । ओदौद्भ्यां क्यचः स्वरवद्भावादवावादेशः नमस्तपोवरिवसां कर्त्तृत्वेऽपि क्यचोविधानात् नमस्यति देवानित्यस्य देवनतिं तपस्यति शत्रुमित्यस्य शत्रुसन्तापं वरिवस्यति गुरूनित्यस्य च गुरूणां परिचर्य्यां करोतीत्यर्थः । श्येनायते काकइत्यादौ क्यङोऽपि

काकाचारसदृशाचारोऽर्थः तत्र च प्रकृत्यर्थस्य श्येनादेः कर्तृत्वेनैव साकाङ्क्षत्वात् श्येनकर्तृकाचारसदृशाचारवान् काक इत्येवं तत्र बोधः । श्येनकर्तृकाचारश्च मांसहरणादिर्ग्राह्यः । श्येनी इवाचरतीत्यर्थे श्येनायते काकीत्यत्र भाषितपुंस्कत्वात् क्यङि पुंवद्भावः गार्ग्यमिच्छतीत्याद्यर्थे गार्गीयतीत्यत्र क्यचीव गार्ग्यं इवाचरतीत्याद्यर्थे गार्गीयते इत्यत्र क्यङ्यप्यपत्यप्रत्ययस्य लोपः । तथा वाजीयतीत्यादौ नस्य । ओजायते अप्सरायते पयायते पयस्यते गर्द्दभति अश्वतीत्यादावप्युक्तरीत्यैवान्वयः ओजसप्सरसोर्नित्यं पयसः सोर्विभाषया । क्यङोऽपि लोपोऽस्त्यग्रेऽगर्द्दभत्यश्वतीत्यत इतिवचनादेषु सादेर्लोपः अत्रौजःपदस्यौजस्विपरत्वमिति निबन्धारः । गव्यते नाव्यते इत्यादेरपि गौरिवाचरतीत्यादिरर्थः पूर्ववदवादेशः पूर्व्वमनुन्मना उन्मनावदाचरति इत्यर्थेऽप्युन्मनायते दुर्म्मनायते अवेहत् वेहदिवाचरतीत्यर्थे वेहायतीत्यादौ तस्य लुक् । गौर्गर्भघातिनी वेहत् । अलोहितो लोहितोभवतीत्यर्थे लोहितायति लोहितायते स्वरितत्वादुभयपदं सुखमनुभवति इत्यर्थे सुखायते एवं दुःखायते अलीकायतेइत्यादि । शब्दं करोतीत्यर्थे शब्दायते एवं वैरायते कलहायते । गिलितस्य पुनश्चर्व्वणं रोमन्थः तं करोतीत्यर्थे रोमन्थायते गौः । मुण्डादेस्तत् करोत्यर्थे गृह्णात्यर्थे कृतादितः । वक्तीत्यर्थे च सत्यादेरङ्केभ्यस्तन्निरस्यतीति भागुरिस्मृतेः नरं मुण्डयतीत्यत्र नरनिष्ठमुण्डनं जलं मिश्रयतीत्यत्र जलनिष्ठमिश्रणं वासः श्लथयतीत्यत्र वासोनिष्ठश्लैथिल्यम् अन्नं मधुरयति इत्यत्रान्ननिष्ठमाधुर्य्यं चैत्रं मित्रयतिइत्यत्र चैत्रनिष्ठमित्रत्वं करोतीत्यादिर्नामप्रकृतिकस्य णेरर्थः । तत्र मुण्डादिपदस्य धर्म्मपरत्वात् मुण्ड्यादिण्यन्तधात्वर्थतावच्छेदकीभूतफलवत्त्वाच्च नरादेः कर्म्मत्वमिति सम्प्रदायविदः । वासः पृथु मृदु भृशं वा करोतीत्यर्थे वासः प्रथयति म्रदयति भ्रशयति इत्यादावतो

रेफादेशः । तथा चैवं परिब्रढयति इत्यत्रापि । कण्ड्वादिभ्यस्तत् करोतीत्यर्थे यगेव नतु णिः तेन गात्रं कण्डूयति कण्डूयते वा इत्यत्र गात्रस्य कण्डुं करोतीत्यर्थः ञित्त्वादुभयपदम् एवं स्वर्गलोके महीं वसतिस्थानं करोतीत्यर्थे स्वर्गलोके महीयते ङानुबन्धेषु पाठादात्मने-पदं शब्दादिभ्यः करोतीत्यर्थे क्यङेवेत्युक्तम् । सत्यति वर्मयतीत्यादौ गृह्णातीत्यादिरर्थः सत्यापयति अर्थापयति वेदापयति इत्यत्र च सत्यं वक्तीत्यादिरर्थः सत्यादित्रिकादावागमश्च प्रियं स्थिरं वा वक्तीत्यर्थे प्रापयति स्थापयति इत्यादौ प्रियस्थिरादेः प्रस्थाद्यादेशो-ऽपि अश्मतरं वदतीत्यर्थे अश्मयति इत्यत्र तरप्रत्ययलोपश्च गोमन्त माचष्टे इत्यर्थे गवयति गुणवन्तमाचष्टे इत्यर्थे गुणयति स्रग्विणमा-चष्टे इत्यर्थे स्रजयति इत्यादौ तु मन्तुवन्तुविनां लुगपि तथा कर्त्तार माचष्टे इत्यर्थे कारयतीत्यत्र तृचः अन्तिकमाचष्टे इत्यर्थे नेदयति वाढमाचष्टे इत्यर्थे साधयति इत्यत्र चान्तिकवाढयोर्नेदसाधौ च युवानमल्पं वा वदतीत्यर्थे कनयति युवाल्पयोः कन्वेत्यनुशिष्टेः पक्षे यवयति अल्पयति इत्यपि । स्थूलमाचष्टे दूरमाचष्टे इत्याद्यर्थे स्थूल दूरयुवह्रस्वक्षिप्रक्षुद्राणामन्तस्थादिलोपो गुणश्चेत्यनुशिष्टेः क्रमेण स्थवयति दवयति यवयति ह्रसयति क्षेपयति क्षोदयति इत्येव प्रयोगः । बहुमाचष्टे इत्यर्थे भूययति बहोर्भूयादेशः । हस्ताद्यङ्गेभ्यस्तन्निरस्यतीत्यर्थेऽपि णिः तेन हस्तं निरस्यतीत्याद्यर्थे हस्तयते पादयते इत्यादि पूर्ववदा-त्मनेपदम् । तूस्तादिघाते संक्रादे वस्त्रात्पुच्छादितस्तथा । उत्क्षेपादौ कर्म्मणो णिस्तत्तदव्ययपूर्वत इति भागुरिस्मृतेः तूस्तं विनिहन्तीत्यर्थे वितूस्तयति तूस्तं केशजटा वस्त्रं संच्छादयतीत्यर्थे संवस्त्रयति पुच्छ मुत्क्षिपतीत्यर्थे उत्पुच्छयते गौः एवं परिपुच्छयते भाण्डानि समि-नोतीत्यर्थे संभाण्डयते भिक्षुः चीवरं सम्मार्ज्जयतीत्यर्थे सञ्चीवरयते । कर्म्मण इत्युक्तेस्तूस्तेन विनिहन्तीत्याद्यर्थे न णिः तूस्तयति प्रतूस्तयति

इत्यादितः कथितार्थानामप्रतीतेस्तत्तदव्ययपूर्व्वकत्वनियमः। वीणात उपगाने स्याद्धस्तितोऽतिक्रमे तथा। सेनातस्त्वभियाने णिः श्लोका-देरप्युपस्तुताविति भागुरिस्मृतेरत्रापि तत्तदव्ययपूर्व्वत इत्यनुषज्यते। तथाच वीणया उपगायतीत्यर्थे उपवीणयति यशः हस्तिनातिक्रामतीत्यर्थेऽतिहस्तयति गृहं सेनयाभिमुखं यातीत्यर्थेऽभिसेनयति समरं श्लोकैरुपस्तौतीत्यर्थे उपश्लोकयति शिवमित्यादिकः प्रयोगः। कर्म्मप्रत्यये तूपवीण्यते यश इत्यादि वीणादेः करणतास्थल एवायं विधिरतो वीणायामुपगायतीत्याद्यर्थे न णिः साधुः। अशनधनाभ्यामाय उद-कान्नः कोऽपत्य तदिच्छतीत्यर्थे तेन अशनायति धनायति उदन्यतीत्यादावशनमिच्छतीत्यादिरर्थः। अशनायादिकं धात्वन्तरमित्यपि वदन्ति। चैत्रं भावयति आत्मानं गमयति इत्यादौ धातुप्रकृतिकस्य णेरप्यनुकूलव्यापारो व्यापारमात्रं वार्थः तत्र धात्वर्थस्यानुकूलतायाः संसर्गविधयापि भानसम्भवात् तेन तत्र चैत्रोत्पत्त्यनुकूलव्यापारवान् आत्मगत्यनुकूलव्यापारवानित्यादिरर्थः। क्वचिज्ज्ञानस्यानुकूलव्यापारोऽपि णेरर्थः यथा कथकः कंसं घातयति इत्यादावभिनयादिरूपः। चुरादिभ्यस्तु स्वार्थिकस्य णेः स्वरूपमर्थः तेन चोरयति चिन्तयति इत्यादौ स्तेयादिस्वरूपस्यानुकूलकृतिमानित्यादिरर्थः। गुपूधूपविच्छिपणिपनेरायः कमेस्तु णिङ्। ऋतेरीयङ् चतुर्लेषु नित्यं स्वार्थे परत्र वेति भागुरिः। स्वार्थे स्वरूपार्थे तेन गोपायतीत्यस्य रक्षास्वरूपं धूपायति इत्यस्य सन्तापस्वरूपं विच्छायतीत्यस्य गतिस्वरूपं पणायते इत्यस्य व्यवहारस्वरूपं स्तुतिस्वरूपं वा करोतीत्यर्थः। आकर्णया-मास न वेदनादाप्रचोपलेभे वणिजां पणाया इतिव्यवहारार्थे भट्टिः। पनायते इत्यस्य तु स्तुतिस्वरूपं करोतीत्येवार्थः स्वरूपार्थकत्वात् अ-स्यापि विप्रगोपाया स्वर्गानन्त्यप्रदा भवेदित्यादिकः प्रयोगः अल्पादेः क्रियाविशेषणत्वे क्लीवत्वापत्तेः इत्युक्तप्रायं स्वर्गं कामयते इत्यस्य स्वर्ग

गोचरेच्छास्वरूपवानित्यर्थः ङानुबन्धत्वादात्मनेपदम् ऋतीयते इत्यस्य घृणास्वरूपं करोतीत्यर्थः । परञ्च वेत्युक्तेस्तुरीयकारादश्च गोप्ता गोपायिता कमिता कामयिता अर्त्तिता ऋतीयिता इत्यादिकोऽपि-विधः प्रयोगः । गुपेर्वधेश्च निन्दायां क्षमायां च तथा तिजः । प्रतीकाराद्यर्थकाच्च कितः स्वार्थे सनोविधिरिति भागुरिः तेन जुगुप्सते बीभत्सते इत्यत्र निन्दास्वरूपस्य कर्त्ता इत्यर्थः अतएव जुगुप्सा स्वल्पापि क्षपयति महत्त्वं परिषदीत्यादिकः प्रयोगः तपस्तितिक्षते इत्यस्य तपःकर्म्मकसहनस्वरूपस्य कर्त्तेत्यर्थः चिकित्सत्यातुरमित्यस्यातुरकर्म्मकप्रतीकारस्वरूपं करोतीत्यर्थः रिपुं विचिकित्सतीत्यस्य रिपुकर्म्मकनिग्रहस्वरूपं करोतीत्यर्थः विचिकित्सति मन्मन इत्यादौ च मन्मनः सन्देहस्वरूपवदित्यर्थः । एषामर्थान्तरे तिङो नाभिधानमिति भागवृत्तिः तेन संगोपननिशाननिवासाद्यर्थेषु गोपनं तेजनं केतनमित्यादिकमेव प्रत्युदाहरणं मानदानशानभ्योऽपि स्वार्थे सन् तेन मान् पूजायां विचारे वा इत्यस्य मीमांसते दान खण्डने इत्यस्य दीदांसते शान तेजने इत्यस्य शीशांसते इत्यत्राप्युक्तदिशैवान्वयः । पाकं चिकीर्षति ओदनं बुभुक्षते इत्यादाविच्छैव सनोऽर्थः तस्याश्च द्वितीयान्तेन लभ्यस्य पाकादिविशेष्यताकत्वस्य स्वरूपसम्बन्धेन धात्वर्थस्य तु कृत्यादेः स्वसाध्यत्वादिप्रकारिनिष्ठस्वसमानकर्त्तृकत्वसम्बन्धेनान्वयात् पाकधर्म्मिका निरुक्तसम्बन्धेन कृतिमती या इच्छा तद्वानित्यादिरर्थः समानकर्त्तृकत्वस्य निवेशात् अन्यदीयकृति पाकादाविच्छावत्ययं चिकीर्षति पिपक्षति इत्यादिको न प्रयोगः इति चिन्तामणिकृतः । सोन्दडस्तु पाकं चिकीर्षतीत्यादौ द्वितीयार्थस्य विषयत्वस्य मूलधात्वर्थ एवान्वयः तदर्थस्य तु समानकर्त्तृकत्वविषयत्वाभ्यां सनर्थेच्छायां तथाच पाकविषयताककृतिसमानकर्त्तृकत्वद्गोचरेच्छावान् इत्यादिरेवार्थः कारकविभक्तेः क्रियायामेव स्वार्थबोधकत्वादत-

एव गृहं तिष्ठासतीत्यादिको न प्रयोगः स्थितेर्गृहकर्म्मकत्वबाधात् अन्यथा गृहधर्म्मिकां स्थितिप्रकारकेच्छां बोधयन्नयमेव प्रमाणं स्यात् न तु गृहे तिष्ठासतीत्यादिरिति प्राञ्चः। चिकीर्षादेः प्रकृत्यादिरूपेष्ट साधनत्वेन तद्गोचरेच्छासत्त्वेऽपीच्छार्थकसनन्तात् न सन्प्रत्ययः सनन्ताच्च सनिष्यते इत्यनुशिष्टेरतश्चिकीर्षिषतीत्यादिको न प्रयोगः। पापच्यते इत्यादौ यङः पौनःपुन्यमर्थः तच्च प्रकृतधात्वर्थजातीय क्रियोत्तरतादृशक्रियानन्तर्य्यरूपं प्रकृत्यर्थे विशेषणत्वेनान्वेति तेन पाकोत्तरपाकानन्तर्य्यवत्पाककर्त्ता इत्येवं तत्र वाक्यार्थः। द्विः पक्तरि पुनः पक्तृत्वेऽपि न निरुक्तं पुनः पुनः पक्तृत्वम् अतोन तत्र पापच्यते इति प्रयोगः पाकोत्तरत्वादिकञ्च तत्समानकर्तृत्वगर्भं बोध्यम् अतः पुरुषान्तरीयपाकाद्युत्तरत्वमादाय नातिप्रसङ्गः। तण्डुलं पापच्यते इत्यादौ यङन्तधातूपस्थाप्ये सर्व्वत्रैव पाकादौ तण्डुलकर्म्मत्वस्यान्वयोव्युत्पत्तिवैचित्र्यात् नातः क्रमेण मुद्गमाषौ पक्त्वा तण्डुलस्य पक्तरि तथाविधप्रयोगः तुषेण पापच्यते इत्यादौ कारकान्तरमप्येतेन व्याख्यातं जंगम्यते चङ्क्रम्यते इत्यादौ धात्वर्थगतं पौनःपुन्यमिव कौटिल्यमपि यङोऽर्थः गत्यर्थात् कौटिल्य एव तद्विधानात् तेन पुनः पुनः कुटिलगतिमान् इत्येवं तत्र बोधः शेषं पूर्व्ववत्। लोलुप्यते पंपूर्य्यते जंजप्यते दंदश्यते जेगिल्यते इत्यादौ निन्दितत्वमपि तेन पुनः पुनर्गर्हितं लुम्पति चरतीत्यादिकस्तत्रार्थः। अत्रोत्सर्गत एव एकाचो हलादेरेव धातोर्यङ्विधानात् पुनः पुनः कथयति जागर्त्ति दरिद्रातीत्याद्यर्थे कथ्यादेर्न यङ्नापि पुनः पुनरेति एजते इत्यादाविन प्रभृतेः सूचप्रभृतिभ्यश्चेति विशेषविधेस्तु पुनः पुनरियर्त्ति अश्नाति अटतीत्याद्यर्थे अरार्य्यते अशाश्यते अटाट्यते इत्यादिकः प्रयोगः शुभिरुचिभ्यां तु न स्यात् पुनः पुनः शोभते रोचते इत्यर्थे शोशुभ्यते इत्यादेर्निराकाङ्क्षत्वादिति वदन्ति।

तद्धितं लक्षयति ।

विभक्त्यादित्रिकादन्यः प्रत्ययस्तद्धितं मतम् ।
नामप्रकृतिको नैवमतिव्याप्त्यादिदोषतः ।

विभक्तिधात्वंशकृद्भ्योऽन्यः प्रत्ययस्तद्धितं ह्रस्वक इत्यादौ ह्रस्वाद्यर्थकः कादिरपि तद्धितमेव तदन्यत्वेनापि प्रत्ययं विशेषयन्त्यन्ये नामप्रकृतिकप्रत्ययत्वन्तु न तद्धितस्य लक्षणं विभक्तौ क्यजादौ चातिव्याप्तेः पचतितरामित्यादौ तरामाद्यव्याप्तेश्च ।

विभजते ।

तस्यापत्यं तद्विशेषस्तदृक्षेण युतेन्दुमान् ।
कालस्तथा तेन रक्तं तस्य व्यूहोऽथ वेत्ति तत् ।
अधीते वा देवतास्य सैवमादीन् यथायथम् ।
बोधयद्विविधानर्थांस्तद्धितं स्यादनेकधा ।

तस्यापत्यस्य विशेषो गुर्व्वायत्तत्वप्रथमत्वादिः ।

अपत्यार्थं व्याकुरुते ।

अण् नाम्नोऽपत्यसामान्ये षष्ठ्यन्ताद्बाधकं विना ।
अदन्तादिञ् निषादादेरन्त्याचोऽक् चेत्यपेक्षितम् ।

षष्ठ्यन्तान्नाम्नः साक्षात्परम्परासाधारणापत्यसामान्ये बोध्ये अण् इत्युत्सर्गः स च मरीचेरपत्यं मारीचः काश्यपिरित्यादौ अपत्यविशेषभाने तु तद्धितभेदो वक्ष्यते मरीचिना अपत्यमित्यर्थे तु न षष्ठ्यन्तं नाम । अणो बाधकमाह अदन्तादिति अदन्तान्नाम्नो बाधकं विना इञेव दक्षस्यापत्यं दाक्षिः अस्यापत्यमिः इत्यादौ तत्रापि निषादादेरिञा अपत्यबोधने तदन्तिमाचोऽकादेशोऽपेक्षितः यथा नैषादकिः वैयासकिः चाण्डालकिरित्यादौ ।

इञोऽपवादमाह ।

शिवादिभ्यस्त्वणेव स्यात् ञो गर्गादेर्यञस्तथा ।
कुञ्जादेरायनण् ण्यश्च तस्मान्नैव स्त्रियामिति ।

तथा ।

तिकादेरायनिञ् नित्यं तदादेस्तु विभाषया ।

ईयः स्वसुः स च व्यभ्रातुर्य्यः श्वशुराद्भवेत् ।

तिकस्यापत्यमित्यर्थे नित्यमायनिञ् यथा तैकायनिः कौशल्यायनिरित्यादौ कौशल्यायनिवक्षभामिति भट्टिः । स च तदादेः सर्व्वनाम्नो वैकल्पिकः यथा तस्यापत्यमित्याद्यर्थे तादायनिः तादः यादायनिः यादइत्यादौ स्वसुरपत्यमित्यर्थे स्वस्रीयः भ्रातुरपत्यमित्यर्थे भ्रात्रीयः भ्रातृव्यः द्वेष्टरि तु भ्रातृव्यशब्दोरूढ़एव तदुक्तं भ्रातृव्यौ भ्रातृजद्विषाविति श्वशुरस्यापत्यमित्यर्थे यः श्वशुर्य्यः ।

तथा ।

कुलाद्य एयकञ्चीनः सपूर्व्वात् केवलादपि ।

महाकुलादञीनञ् च दुष्कुलादेयणोविधिः ।

कुलस्यापत्यमित्यर्थे यः एयकञ् च स्यात् यथा कुल्यः कौलेयकः सपूर्व्वात् केवलाच्च कुलादीनः स्यात् यथा आढ्यकुलीनः कुलीन इत्यादौ महाकुलादञ् ईनञ् च स्यात् यथा माहाकुलो माहाकुलीनः दुष्कुलादेयण् यथा दौष्कुलेयः । केनापि दौष्कुलेयेन कुल्यां माहाकुलीं प्रियाम् । हृतां महाकुलीनस्य तस्य लिप्सामहे वयमिति भट्टिः । कथं महाकुलीनो दुष्कुलीनः सपूर्व्वादीन् महदादेः कुलीनेनान्वयइत्यन्ये ।

देशक्षत्रिययोरूढ़ाच्छब्दात्तत्रापत्येऽप्यणोविधिः ।

नादेः कुरोः कोशलाच्च ण्यस्तथेदन्ततोप्यऽसौ ।

देशे क्षत्रिये च शब्दाच्छब्दोराजन्यपत्यार्थे अणोविधिः यथा पञ्चालानां राजापत्यं वा इत्यर्थे पाञ्चालः एवं वैदेहः एवं ऐक्ष्वाकः । क्वचिदणादावप्युवर्णस्य लोपः नकारादेरछब्दात् कुरुतः कोशलाच्च तादृशार्थे ण्यएव यथा नैषध्यः कौरव्यः कौशल्यः इत्यादौ । कथं

हिरण्मयं हंसमबोधि नैषधः परिरेभिरे कुकुरकौरवस्त्रिय इति यदि तस्येदमित्यण्। इदन्तादप्युक्तरूढात् ण्यः यथा कौरव्यः आवन्त्यः इत्यादौ कथं कौन्तेयः कुन्तीशब्दात् स्त्रीप्रत्ययान्तात् एयण्। स्त्रियान्तु कुन्त्यवन्तिकुरुभ्योण्यस्य लुगेव यथा कुन्तीनां स्त्र्यपत्यमित्यर्थे कुन्ती एवमवन्ती कुरुः। कम्बोजादेरपि रूढादपत्ये राजनि च विहितस्याणो लुगेव यथा कम्बोजानामपत्यं राजा वा इत्यर्थे काम्बोजश्चोलः केरल इत्यादौ।

संख्यासंभद्रपूर्व्वाया उरण्मातुः स्त्रियाश्च ङीप्।
गोर्या ण्यस्तु यमादित्यादितिभ्यः स्याद्दितेरपि।

द्वयोर्म्मात्रोरपत्यमित्यर्थे द्वैमातुरः त्रैमातुरः षाण्मातुरः शक्तिधरः कुमारइत्यमरः साम्मातुरः भाद्रमातुरः स्त्रियान्तु तदन्तात् ङीप् द्वैमातुरीत्यादि गोरपत्यमित्यर्थे य एव गव्यो वत्सः। एवं यमस्यापत्यं याम्यः आदित्यस्यापत्यमादित्यः अदितेरपत्यमित्यर्थे आदित्यः दितेरपत्यं दैत्यइत्यादौ ण्यएव कथमादितेयः दैतेयः अदितिदितिभ्यां स्त्रीप्रत्ययान्तत्वादेयण्।

अपत्यम्।

नापत्यप्रत्ययान्तात् स्यादपत्यप्रत्ययः पुनः।
गुर्व्वायत्ते त्वपत्ये स्यात् पुनर्यूनीति तद्विधेः।

उपगोरपत्यस्यापत्यमित्यर्थे औपगवादिपदेभ्योनापत्यप्रत्ययः अत एव एकोगोत्रे इति पाणिनिरप्याह एवः केवलोऽपत्यप्रत्ययं विना प्रतएव शब्दो गोत्रेऽपत्यसामान्ये विहितप्रत्ययस्य साकाङ्क्ष इति तदर्थः पुनर्यूनीतिविध्यन्तरसत्त्वादेव चौपगवस्य गुर्व्वायत्तापत्यमित्यर्थे औपगविः गार्ग्यायण इत्यादौ पुनरपत्यप्रत्ययः गुर्व्वायत्तं यत् प्रशस्तं तदपत्यं युवेोच्यते इति वृद्धाः।

ञ्यान्तयञन्तादायनण् स्यात् कौञ्जायन्यादिवर्जितात् ।
गुर्व्वापत्ये केवलाच्च द्रोणादेश्च विभाषया ।

ञ्यन्तादियञन्ताच्च गुर्व्वापत्यापत्यस्य बोधने आयनण् स्यात् यथा गार्ग्यस्य गुर्व्वापत्यापत्यमित्यर्थे गार्ग्यायणः वात्स्यायनः दाक्षायण इत्यादौ । ञ्यन्तादपि कुञ्जादिगणान्नासौ तेन तत्र कौञ्जायन्योऽयमित्यादिरेव प्रयोगः । केवलादपत्यप्रत्ययशून्यादपि द्रोणादायनण् यथा द्रोणस्य प्रथमापत्यं द्रौणायनोऽश्वत्थामा विभाषयेत्युक्तेः पक्षे द्रौणिरित्येव ।

गर्गादेरपि कुञ्जादेः प्रथमापत्यबोधने ।
इञेव स्यान्न तु ञ्यः स्यान्नायनण् स्यादिति स्थितिः ।

गर्गस्य प्रथमापत्यमित्यर्थे गार्गिर्व्वात्सिरित्यादौ न ञ्यः किन्त्विञेव तथा कुञ्जस्य प्रथमापत्यमित्यर्थे कौञ्जिर्मौञ्जिरित्यादावपि नायनण् ।

अपत्यविशेषः ।

तद्युक्तेन्दुमत्काले तन्नक्षत्रादणो विधिः ।
नक्षत्रद्वन्द्वतश्छीयः कथितार्थे विधीयते ।

पुष्येण सहेन्दुमदित्यर्थे पौषं दिनं पौषी रात्रिः एवमाश्विनं श्रावणं कार्त्तिकमित्यादौ । तद्युक्तेन्दुमत्काल इत्येव नातः पुष्येण सहेन्दुमत् पुरमित्यर्थे पौषं पुरमित्यादिकप्रयोगः । नक्षत्रद्वन्द्वात् कथितार्थे छोऽणोबाधक ईय एव यथा पुष्यपुनर्व्वसुभ्यां सहेन्दुमद्दिनं पुष्यपुनर्व्वसवीयम् एवमश्विनीभरणीया रात्रिरित्यादिप्रयोगः ।

नक्षत्रेण युतेन्दुमत् ।

तद्रागयुक्तमित्यर्थे तस्मादण् स्यादिकण् पुनः ।
लाक्षारोचनातश्च शकलात्कर्द्दमात्तु वा ।

हरिद्रया रागयुक्तमित्यर्थेऽण् यथा हारिद्रं वासः एवं कौसुम्भं लाक्षया रक्तमित्यर्थे नित्यमिकण् यथा लाक्षिकं रोचनिकं शकल

कर्दमाभ्यां तेन रक्तमित्यर्थे विभाषयेकञ् यथा शाकलिकः शाकलः कार्दमिकः कार्दमः इत्यादौ ।

तथा ।

> नीलादः कस्तथा पीतात् निविकल्पादपि नित्यशः ।
> स्वभावरक्ते गोरुच्या तु कृच्या तद्धितमुच्यते ।

नीलेन नील्या वा रक्तमित्यर्थे नित्यमप्रत्ययो यथा नीलः पट इत्यादौ पीतेन पीतया वा रक्तमित्यर्थे तु नित्यं कप्रत्ययो यथा पीतकः पटइत्यादौ हारिद्रः कुक्कुटपादः लाक्षिकमधरं पीतकं स्वर्णमित्यादौ स्वभावसिद्धपीतादौ गोरुच्या हरिद्राद्यैरक्तसदृशे तद्धितं प्रयुज्यते । तेन रक्तम् ।

> तेषां समूहइत्यर्थेऽप्यण् पाशादेस्तु यः स्त्रियाम् ।
> गर्गादिगोत्रादुक्षादेश्चाकस्तीयस्तु वाश्वतः ।

काकानां समूहः काकम् एवं शुकानां शौकं भिक्षाणां भैक्षं युवतीनां समूहइत्यर्थे यौवतमिति जयादित्यः । तद्धितानपत्यत्वे पुंवद्भावात् यौवनमिति तु भागवृत्तिः अतएव यमुपास्ते पुण्यभाजं कलाकुशलयौवनम् । सरसं नित्यप्रशस्ति सफलं तस्य यौवनमिति तन्मते प्रयोगः । पाशानां समूहइत्याद्यर्थे तु तेभ्यो यएव तदन्तश्च स्त्रीलिङ्गएव यथा पाश्या धूल्या वात्या वन्या प्रस्थेति स्वरत्यादावपि पाशादौ पठन्ति यथा खल्या रथ्या इति । तथा गर्गादिगोत्रेभ्यः समूहेऽकञ् गार्गकं दाक्षकमित्यादौ उक्षां समूह इत्यर्थेऽप्यसौ यथा औक्षकम् औष्ट्रकमित्यादौ । उक्षोष्ट्रोरभ्रवत्सराजा राजा राजन्यकस्तथा । राजपुत्रमनुष्यश्च वत्सउक्षादिकोगणः । अश्वानां समूहे त्वीयो विभाषया यथा अश्वीयमाश्वमिति ।

> धेनोरनञः कञ्नित्यं केदाराद्यश्चिकस्तथा ।
> पिष्टात् कवचिहस्तिभ्याश्चेकञ् केशादिकञ्ययौ ।

धेनूनां समूहो धैनुकम् अधेनोस्त्वाधेनवमित्यत्रैव अस्मादेवानञ इति निषेधात् सामूहिकप्रत्ययेषु तदन्तविधिरेष्टव्यः तेन सुन्दरगर्गाणां समूह इत्यर्थे सौन्दरगर्गकमित्यादि साध्विति शाब्दिकाः। केदाराणां समूह इत्यर्थे यञि कैदार्य्यम् ठञि कैदारिकम् अकञि कैदारकम् इति त्रिधा प्रयोगः। पिष्टार्थकात् कवचिनो हस्तिनश्चैकञ् यथा पूपानां समूहः पौपिकं शाष्कुलिकं तथा कवचिनां समूहः कावचिकं हस्तिनां हस्तिनीनां वा समूहो हास्तिकम्। केशानां समूहे त्विकञ् यञ् च कैशिकं कैश्यम्।

इनिः खलोलूकपद्माद्रथात् कट्यः स्त्रियामिमौ।
गणिकातो ब्राह्मणाच्च मानवाद्वाडवाच्च यञ्।

खलादिभ्य इनिः समूहे यथा खलिनी उलूकिनी पद्मिनी। तथा रथात् कट्यः यथा रथकट्येति इमौ च प्रत्ययौ स्त्रियामेव। गणिकादिभ्यस्तु समूहे यञ् यथा गाणिक्यं ब्राह्मण्यं मानव्यं वाडव्यमिति।

गजबन्धुजनग्रामसहायेभ्यस्तु तः स्त्रियाम्।
पृष्ठाद्यत् क्लीबलिङ्गं तत् चरणेभ्यस्तु धर्म्मवत्।

गजता बन्धुता जनता सहायता इत्यत्र गजादीनां समूहेऽर्थे तप्रत्ययः स च स्त्रीलिङ्ग एव। पृष्ठात् समूहे यत् यथा पृष्ठ्यं तच्च क्लीबलिङ्गमेव अतएवास्य पाशादिष्वनन्तर्भावः चरणेभ्यस्तु समूहे धर्म इव प्रत्ययाः स्युः यथा कठानां धर्म्मः काठकं तथा समूहोऽपि एवं छान्दोग्यमाथर्व्वणमित्यादि।

तत्समूहः।

तद्वेत्ति तदधीते वेत्त्यर्थेऽप्यण् क्रतुवाचिनः।
सूत्रान्ताद्व्यवस्थादेष्ठक्थादेश्चैकञो विधिः।

निमित्तं वेत्तीत्यर्थे नैमित्तः एवमौत्पातः मौहूर्त्तः छन्दो वेत्त्यधीते

वेत्त्यर्थे छान्दसः वैयाकरणः क्रतुवाचिनोऽग्निष्टोमादेष्ठिकण् यथा अग्निष्टोमं वेत्ति अधीते वा आग्निष्टोमिकः अकल्पादेः सूत्रान्तशब्दा दप्युक्तार्थे इकण् यथा वार्त्तिकसूत्रिकः सांख्यसूत्रिकः कल्पादेस्तु सूत्रात् काल्पसूत्रइत्यणेव । उक्थं वेत्त्यधीते वा इत्यर्थेऽप्यौक्थिकः नैयायिकः पातञ्जलिकः लोकायतं बौद्धशास्त्रं तद्वेत्त्यधीते वा लौका-यतिकइत्यादि ।

विद्यान्तादङ्गधर्म्मक्षत्रानुत्तरवर्त्तिनः ।
तथेकण् शतषष्टिभ्यां परस्य तु पथष्टिकः ।

वायसविद्यां वेत्त्यधीते वा वायसविद्यिकः सर्पविद्यिकः चौर विद्यिकः । अङ्गाद्यनुत्तरवर्त्तिनः किम् आङ्गविद्यः ज्योतिर्व्विद्यः गान्धर्व्वविद्यः धार्म्मविद्यः क्षात्रविद्यः त्रयवयवा विद्या त्रिविद्या तां वेत्त्य धीते वा त्रैविद्यइति कर्म्मधारयादण् । त्रैविद्या मां सोमपाः पूतपापा इति गीता । तिस्रो विद्या वेत्तीत्याद्यर्थे तु द्विगुतस्तद्धितस्य लुकि त्रिविद्यइत्येवम् । शतपथं षष्टिपथं वेत्तीत्याद्यर्थे टिकः शतपथिकः षष्टिपथिकः स्त्रियान्तु शतपथिकीत्यादि ।

क्रमादिभ्यः कएव स्यात् पदात् कः स्यादिकस्तथा ।
सर्व्वादेरथ साद्यादेर्वेत्तीत्याद्यर्थकस्य लुक् ।

क्रमं वेत्तीत्याद्यर्थे क्रमादिभ्यः कएव यथा क्रमकः सामकः शि-क्षकः मीमांसक इत्यादौ । पदात्तु कः स्यादिकोऽपि यथा पदकः पदिकः । सर्व्वादेः साद्यादेश्च शब्दाद्विहितस्य वेत्त्यधीते वेत्त्यर्थकस्य तद्धितस्य लुगेव यथा सर्व्वं वेदं वेत्तीत्याद्यर्थे विहितस्याण्प्रभृतेः सर्व्ववेदः सर्व्वतन्त्रइत्यादौ सादिवार्त्तिकइत्यादौ चेति ।

अष्टाध्यायादितः कः स्यादध्यायस्य च लुक् तथा ।
अध्यायसंख्यार्थककाद्वेत्त्याद्यर्थस्य लुक् परे ।

अष्टावध्याया यस्य तदष्टाध्यायसूत्रं तद्वेत्त्यधीते वेत्त्यर्थे कः अध्याय

पदस्य च लुक् यथाष्टकाः पाणिनीयाः पञ्चकाः गौतमीयाः दशकाः व्यासपदीयाः द्वादशकाः जैमिनीयाः परे पुनरष्टावध्यायसंख्या यस्य इत्यर्थे कप्रत्ययं कृत्वा तद्वेत्त्याद्यर्थकस्य तद्धितस्य लोपमाहुः ।

तद्वेत्त्यधीते वा ।

तस्येदमिति सम्बन्धिन्यपि तस्मादणोविधिः ।
स्वराजपरदेवेभ्यः कादिरीयोजनादपि ॥

तस्येदमित्येवं तत्सम्बन्धिन्यर्थे तदर्थकादण् इत्युत्सर्गः । यथा वृक्षस्येदं वार्क्षं एवं दार्षदमित्यादि । स्वस्येदमित्याद्यर्थे तु स्वराजादिभ्यः कादिरीयो यथा स्वकीयं राजकीयं परकीयं देवकीयं जनकीयमिति । स्वतः कस्यानित्यत्वं अतएव स्वीयं यदन्यभिन्नं पदमिति मणिदीधितिरिति वदन्ति ।

ईयस्त्यदादेर्भवतस्तत्र तोदश्चकस्यपि ।
परावरादितोऽप्यर्द्धात् यदिकस्यपि दिक्परात् ।

त्यस्येदमित्याद्यर्थे त्यदादिगणादीयः यथा त्यदीयं तदीयं मदीयं इदमीयमित्यादि । भवतस्तु त्यदादेरीये परतः तस्य दादेशोऽपि यथा भवदीयं नये स्वरे तद्धितइति पदान्तविधेर्निषेधादस्य विधिः । अणन्तस्य तु भवतस्तस्येदमित्यर्थे भावतमित्यस्यैव । परायुत्तरवर्त्तिनोऽर्द्धादपि न केवलाच्च तस्मात् परार्द्धस्येदमित्यर्थे यदेव । यथा परार्द्ध्यं अवरार्द्ध्यं अर्द्ध्यं आदिपदात् उत्तरार्द्ध्यं अधमार्द्ध्यं दिग्वाचिपूर्व्वकात् पुनरर्द्धात् यदिकस्यपि यथा पूर्व्वार्द्ध्यं पौर्व्वार्द्धिकं दक्षिणार्द्ध्यं दाक्षिणार्द्धिकमित्यादि ।

युष्माकास्माकभावान्ते वाखीनञ् युष्मदस्मदोः ।
तवेत्यस्मान्ममेत्यस्मादखीनस्यपि कादिमः ।

युवयोर्युष्माकं वा इदं आवयोरस्माकं वा इदमित्यर्थे युष्मदस्मदोर्युष्माकास्माकभावोत्तरमखीनञ् च वा स्यात् यथा यौष्माकं यौष्माकीणं

आस्माकमास्माकीनम्। अःस्माकदन्तिसान्निध्यामनीभूतभूरुहः। पक्षे त्यदादित्वाद्दीये यथा युष्मदीयमस्मदीयमिति। तवेदं ममेदमित्यर्थे तवममेत्यनयोरखीनस्यपि कादिकः स्यात् यथा तावकं तावकीनं स्वरूपनिर्द्देशान्न त्वदादेशः। अपिना त्यदादित्वादीयेऽपि यथा त्वदीयं मदीयमिति।

कञरण्याद्धस्तिवर्त्म विहाराध्ययमानुषे।
नित्यं वा गोमयेऽन्यत्र णः सदा स्यादिति स्थितिः।

अरण्यस्यायं हस्तीत्याद्यर्थे अरण्यान्नित्यं कञ् यथा आरण्यकः करी पन्था विहारो मानुषश्च अध्यायश्चारण्यगीतत्वादारण्यकः। गोमये त्वरण्यस्येदमित्यर्थे आरण्यकमारण्यं वा गोमयमिति द्विधा प्रयोगः। कथितेभ्योऽन्यस्मिन्नर्थेऽरण्यान्नित्यं णप्रत्ययएव यथा अरण्यस्येयमित्यर्थे आरण्या लता आरण्यः पशुरित्यादि।

तस्येदम्।

यत् तत्र भवइत्यर्थे पदादुत्सर्गतो भवेत्।
ग्रीवात एयञ् वा तत्र ग्रैवं ग्रैवेयमित्यपि।

भवइत्यस्य उत्पत्तिवर्त्तमानत्वे द्व्यर्थौ यथायथम्।

आदेर्मध्यात्तथाग्रार्थे मोऽधसः सस्य लुक् तथा।
डिमोऽग्रपश्चादन्तेभ्यः कालार्थात्तु पदादिकञ्।

आदौ भवः आदिमः भवो वर्त्तमानइति वर्द्धमानवृत्तिः। मध्ये र्विराजते तन्वि तवायं हारमध्यमः। अधोभवइत्यर्थेऽधसः सलोपादधमः। यदङ्गमधमं तस्य स्पर्शनं दुरितावहमिति स्मृतेः। अग्रे भव इत्यर्थे डिमः अग्रिमः एवं पश्चिमः अन्तिमः कालार्थकान्मासादि शब्दात्तु तत्र भवइत्यर्थे इकञ् यथा मासिकं सांवत्सरिकं मौहूर्त्तिकं पौर्व्वाह्णिकं आपराह्णिकमित्यादि।

शरदः श्राद्धएवायं वा तु रोगे तथातपे।

निशातश्च प्रदोषाच्च वायं तादिस्तथा श्वसः ।

भवमिकण्प्रत्ययः तथार्थे शरच्छब्दात् श्राद्धएव साकाङ्क्षः यथा शारदिकं श्राद्धम् । अन्यत्र शारदश्चन्द्रमाः । रोगातपयोस्त्वर्थयोरयं वैकल्पिकः यथा शारदः शारदिकोज्वरः आतपश्च । निशायां प्रदोषे वा भवइत्यर्थे नैशिकं नैशं वा प्रादोषिकं प्रादोषं वा तम इत्यादि । श्वसः श्वःपदात्तु तादिरयमिकण्प्रत्ययस्तथा विकल्पेनेत्यर्थः तेन श्वोभवमित्यर्थे शौवस्तिकं धनम् । शौवस्तिकत्वं विभवा न येषां व्रजन्ति तेषां दयसे न कस्मादिति भट्टिः । पक्षे श्वस्त्यं श्वस्तनमिति श्यतनौ वक्ष्येते ।

सन्ध्यादेश्चर्तुनक्षत्रप्रभेदाच्चाण् फले पुनः ।
संवत्सरात् पर्व्वणि च प्रावृषश्चेण्यमीरितम् ।

सन्ध्यादिगणात्तत्र भवमित्यर्थे अणेव यथा सान्ध्यं सन्धिवेषं आमावस्यं त्रयोदशं चातुर्दशं पाञ्चदशं पौर्णमासं प्रातिपदं वा तमः इति अत्र ऋतुभेदोग्रीष्मादिः तस्मात्तत्र भवमित्यर्थे ग्रैष्मं शैशिरं तदन्तविधिना पूर्व्वग्रैष्मम् अवयवादृतूनामित्युत्तरस्य वृद्धिः । नक्षत्रभेदात्तु पुष्ये भवं पौषं कौमधं तैषं रौहिणमित्यादि । संवत्सरात्तु फले पर्व्वणि च भवार्थेऽणेव यथा सांवत्सरं फलं पर्व्व वा अन्यत्र तु कालार्थत्वादिकण् यथा सांवत्सरिकं कर्म्म प्रावृषि भवइत्यर्थे एण्यः यथा प्रावृषेण्यं तृणम् । प्रावृषेण्यं पयोवाहमिति रघुकाव्यम् ।

वर्षातः स्यादिकण् हेमन्तादण्यत्र वा तलुक् ।
सायं चिरं प्रगे प्राक्के कालार्थाव्ययतस्तनट् ।

वर्षासु भवं वार्षिकं तृणम् । हेमन्ताद्भवार्थे अणेकण् तथा अणि परतश्च तकारस्य वा लुक् तेन हैमन्तिकं हैमनं हैमन्तमिति त्रिविधप्रयोगः । तदन्तविधिना पूर्व्वहैमनमित्यादिरपि प्रयोगः । सायमादिभ्यस्तु सायन्तनं चिरन्तनं प्रगेतनं प्राक्केतनं

दिवातनं दोषातनमित्यादौ भवार्थे तनट् टानुबन्धत्वात् सायन्तनी तिथिः।

प्रगेतश्च परारेश्च चिराच्च त्नो विभाषया।

पुराशब्दात्तथा नो वा मध्याह्नादेश्च वा तनट्।

प्रगत्नं परारित्नं चिरत्नं पक्षे प्रगेतनं परारितनं चिरतनं पुराशब्दादपि भवार्थे वा नः तेन पुराणं पुरातनमिति।

तदाद्यन्तात्तु कालात् स्यादिकण् ङीप् वा स्त्रियां ततः।

मनुष्ये पर्व्वतादीयस्तीयोऽन्यत्र विभाषया।

तत्काले भवमित्यर्थे तत्कालशब्दादिकण् तात्कालिको बोधः एवमापत्कालिकः तदन्तस्य स्त्रियां वा ङीप् यथा तात्कालिकी तात्कालिका मतिरित्यादौ। पर्व्वते भवो मनुष्य इत्यर्थे पर्व्वतादीयण् पार्व्वतीयो नरः ततोऽन्यत्र तु पर्व्वतीयं पार्व्वतं वा फलमित्यादावस्मपि।

दिगादिभ्यो यदेव स्याच्छरीरावयवादपि।

दृतिवस्त्यस्थिकुक्षिभ्य एयण् स्यात् कलसादढेः।

दिशि भवमित्यर्थे दिश्यम् एवमाद्यम् अन्त्यं रहस्यं दिव्यं उदय्यं यूथ्यं वर्ग्यं दण्ड्यमित्यादौ यत्। शरीरावयवादपि यथा दन्ते भवमित्यर्थे दन्त्यम् एवं कण्ठ्यम् ओष्ठ्यं मूर्द्धन्यं मुख्यं जरव्यम् इत्यादौ। दृतौ भवमित्याद्यर्थे तु दृत्यादेरेयणेव यथा दार्त्तेयं वास्तेयं आस्थेयं कौक्षेयम्। असिं कौक्षेयमुद्यम्य चकारापनसं मुखमिति भट्टिः। कालसेयम् आढ्येयमिति।

चतुर्म्मासादयश्चो यस्त्वव्ययीभावतस्तथा।

अन्तःपूर्व्वादिकस्त्वेवं समानात्तत्परादपि।

चतुर्म्मासेषु भवमित्यर्थे चातुर्म्मास्यं व्रतं चतुःपदस्याषाढादिचतुष्कत्वेन लक्षकत्वान्नात्र द्विगुरतः पञ्चकपालश्चरुरित्यत्रेव द्विगोस्तद्धितस्य न लुक्। यद्वे तु चातुर्म्मासो यागः इत्यत्रैव अन्तः-

पूर्व्वादव्ययीभावाद्भवार्थेऽइकण् यथा आन्तर्दैहिकम् आन्तर्गेहिकम् । अव्ययीभावादित्येव तेनान्तःकरणे भवमान्तःकरणं दुःखमित्यस्येव समानात्तत्पराच्च यथा समाने भवं सामानिकम् । सामानिकोऽयं युवयोः प्रयासः । समानदेशिकम् ।

काद्यन्तवर्गादीयः स्याज्जिह्वामूलाङ्गुलादपि ।
मित्राद्युत्तरतो वर्गात् यदीनावीय एव च ।

कवर्गे भवः कवर्गीयो वर्णः इतीयः । एवञ्चवर्गीयः टवर्गीयः इत्यादि । जिह्वामूलादङ्गुलाच्च जिह्वामूलीयः अङ्गुलीयः । मित्राद्युत्तरवर्गात् तु प्रत्ययत्रिकं यथा मित्रवर्गे भवइत्यर्थे मित्रवर्ग्यः मित्रवर्गीणः मित्रवर्गीयः इत्यादि ।

स्त्रीपुंभ्यां नञ्स्नञौ तत्र भवे भावे तु वा तयोः ।
स्वरादौ तद्धिते प्राप्ते गोर्यदेव विधीयते ।

स्त्रियां भवः स्त्रैणः । स्त्रैणेन नीता विकृतिं लघिम्ना इति भट्टिः । पुंसि भवः पौंस्नः । स्त्रियाः पुंसश्च भावेऽर्थे तु नञ् स्नञौ विकल्पेन स्याताम् । तेन स्त्रियाभावः स्त्रैणं स्त्रीत्वञ्च पुंसोभावः पौंस्नं पुंस्त्वञ्च । गोपदात्तु यद्यदर्थे स्वरादितद्धितं प्रसक्तं तत्तदर्थे तदेव साकाङ्क्षं तेन गोरपत्यं गौर्देवता यस्य गवा चरति गोः समूह इत्याद्यर्थे गव्यमित्येव प्रयोगः । गोत्वं गोवदित्यादौ तु त्वादिको न स्वरादिः ।

तत्रभवः ।

ये भवार्थे यतः प्रोक्तास्तद्धितप्रत्ययाः पुरा ।
जातेऽर्थेऽपि ततस्ते स्यु र्विशेषविधिना विना ।

मथुरायां भवः इत्यर्थे इव मथुरायां जातइत्यर्थेऽप्यणोऽतिदेशः । एवं स्त्रैणः पौंस्नः ग्राम्यः ग्रामीणः इत्यादौ नञादेरपि प्रावृष एण्यप्रावृषिकः प्रदोषादेरिकणादिप्राप्तौ च कादिर्विशेष विधेर्व्यज्यते ।

प्रावृषश्च जातेऽर्थे स्यादिकः शरदस्तथा ।
संज्ञायां विहितः पूर्व्वाह्णापराह्णादितस्तु कः ।

प्रावृषि जातमित्यर्थे प्रावृषिकं पद्मं प्रावृषिका वृष्टिः । शरदि जातमित्यर्थे तु संज्ञायामिकण् यथा शारदिकाः मुद्गप्रभेदाः शारदमन्नम् । पूर्व्वाह्णे जातमित्यर्थे तु पूर्व्वाह्णादिभ्यः को यथा पूर्व्वाह्णकं अपराह्णकं मध्याह्नकमित्यादि । एवमार्द्रायां मूलायां जातमित्यर्थे आर्द्रकं मूलकं के समासस्येति ह्रस्वः ।

अकः स्यादमावास्याशब्दात्तद्विकृतादपि ।
स्थानान्तादथ गोशालखरशालाच्च नित्यशः ।
जातार्थकस्य लुग्वा तु वत्सशालादितो भवेत् ।

अमावास्यायां जात इत्यर्थेऽण् अकश्च स्यात् यथा आमावास्यः अमावास्यको बालकः । तद्विकृतादमावास्याशब्दादपि यथा च आमावास्यः अमावास्यकः । स्थानान्तादिहितस्य जातार्थकतद्धितस्य नित्यं लुक् स्यात् यथा गोस्थाने जातमित्यर्थे गोस्थानं पद्मम् एवमश्वस्थानं शश्वस्थानमित्यादौ गोशालायां जातमित्यर्थे गोशालं खरशालं इत्यप्येवम् । नित्यममीषां क्लीवत्वं एभ्यो जातार्थस्य नित्यं लुग्विधानात् अश्विन्यादितो जातार्थकस्य वा लुगिति प्रतीयते । अतएव मघातोऽणो न लुग्भवेत् इत्यग्रे निषेधः करिष्यते इति निबन्धकारः । वत्सशालादितस्तु जातार्थस्य वा लुक् यथा वत्सशालायां जात इत्यर्थे वत्सशालो वात्सशालश्च वृषः । एवमभिजित् आभिजितो वा बालकः । वत्सशालाभिजिच्चित्रा रेवती रोहिणी तथा । अश्वयुक् मृगशीर्षश्च वत्सशालादिको गणः । मृगशिरसि भवं जातं वा इत्यर्थे तु न तद्धितमनभिधानात् ।

अनुराधा तिष्यपुष्यौ हस्तस्वाती पुनर्व्वसू ।
विशाखा बहुलैतेभ्यो नित्यं जातार्थकस्य लुक् ।

अनुराधायां जातोऽनुराधः स्त्रीप्रत्ययस्य लुक् तद्धितलुकीति लुक् एवं तिष्यः पुष्यः हस्तः स्वातिः पुनर्व्वसुः विशाखो बहुलः कथं बाहु-लेयस्तारकजिदिति बहुला कृत्तिका तत्र जातइति संज्ञायामेयञ् ।

श्रविष्ठाषाढयोरेयञ् उञ् वा शतभिषक् पदात् ।

इति महामहोपाध्यायश्रीजगदीशतर्कालङ्कारभट्टाचार्य्यविरचिता
शब्दशक्तिप्रकाशिका समाप्ता ।

अशुद्धिशोधनम् ।

२५ पृष्ठे ११ पंक्तौ "वाक्यार्थं इत्येव,, इत्यत्र "वाक्यार्थं विषया भासते इत्येव,, इति पठनीयम् ।

कुसुमाञ्जलिः

श्रीमदुदयनाचार्य्यविरचितः

श्रीहरिदासभट्टाचार्य्यकृतव्याख्यानसहितः ।

संस्कृतयन्त्रे मुद्रितः ।

कलिकाता

शकाब्दाः १७९८

कुसुमाञ्जलिः ।

प्रथमः स्तवकः ।

ईश्वरीयदनधीतविद्यया तातमातृमुदमाविवर्द्धयन् ।
व्योपयाय भवजन्मकर्म्मणां कोऽपि गोपतनयो नमस्यते ।

इष्टदेवतासङ्कीर्त्तनं ब्रह्मप्रतिपादकसच्छब्दप्रयोगात्मकञ्च मङ्गलं कुर्व्वन् ग्रन्थनामाह ।

सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्द्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघन्यायप्रसूनाञ्जलिः ॥ १ ॥

एषः अनघो निर्द्दोषः न्यायः समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यं स एव कुसुमाञ्जलिः मे मम चित्तं रमयतु दुःखसामग्रीविहीनं करोतु । अनघत्वं शब्ददोषरहितत्वं विषयाशुद्धेः पूर्व्वाद्द्वैव निरासादिति प्रकाशः । अविघ्नं यथा स्यात् ईशस्य पदयुगे पद्यते ऽनेनेति व्युत्पत्त्या पदं प्रत्यायकं तद्युगं प्रमाणतर्करूपं तत्र निवेशितः तद्विषयतया उत्पादितः । चेतः कीदृशं भृङ्गायमाणं भृङ्ग इव मकरन्दे दुःखविगमोपाये सतृष्णं भ्रमत् दुःखविगमोपायमनुसन्द-धत् । प्रसूनाञ्जलिसाम्यमाह सदित्यादि सता समीचीनेन पक्षेणानु-कूलेन रविकिरणादिना प्रसरो विकाशो यस्य स तथा सतां पक्षाणां

दुष्कराणां विनाशो यत्र स तथेति वा सतामनुपहतघ्राणानां परिमलस्य गन्धविशेषस्य प्रोद्बोधेन साक्षात्कारेण बहु उत्सव आनन्दो येन सः विमर्द्दने करपुटविमर्द्दने न विश्रामः नान्यथाभूतसंस्थानः अमृत तुल्यं रसं प्रस्यन्दते इति प्रस्यन्दः एतादृशं माध्वीकं मधु तस्य भूतत्वमित्यस्थानम्। न्यायपक्षे सति प्रामाणिके पक्षतावच्छेदकविशिष्टे पक्षे सिषाधयिषितसाध्यके धर्म्मिणि प्रसरः प्रकर्षेण सरो ज्ञानं यस्मात्। एतेनाश्रयासिद्धिस्वरूपासिद्धिबाधनिरासः। सतां विवेचकानां परि सर्वतोभावेन मलः सम्बन्धो व्याप्तिस्तस्याः प्रोद्बोधेन प्रमया बहु उत्सव आनन्दो येन। एतेन व्यभिचारव्याप्यत्वासिद्धि विरोधानां निरासः। विमर्द्दने विरोधिप्रमाणचिन्तायां न म्लानः न कार्य्यक्षमः तेन सत्प्रतिपक्षराहित्यम्। अमृतं मोक्षः रस इष्यमाणं छद्रिहित इति न्यायात् प्रस्यन्दमुत्पद्यमानं तेन मोक्षस्या साध्यता निराकृता तदेव माध्वीकं तस्य भूतत्वमित्यस्थानम्। १॥

नन्वीश्वरपदयुगनिवेशितस्य न्यायस्य मोक्षरूपफलसम्बन्धे मानाभावः तत्त्वज्ञानविषयात्मबोधकात्मशब्दस्य संसारनिदानमिथ्याज्ञान विषयस्वात्ममात्रपरत्वात् तन्मननस्यैव मोक्षोपायत्वादिति शङ्कायामाह।

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः।
यदुपास्तिमसावत्र परमात्मा निरूप्यते। २॥

स्वर्गापवर्गयोः स्वर्गतुल्ययोः अपवर्गयोर्जीवन्मुक्तिपरममुक्त्योः। ईश्वरमननजादृष्टद्वारा आत्मसाक्षात्कारद्वारा वा मुक्तौ हेतुः तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतिस्तत्कारणत्वे मानम्। आत्मसाक्षात्कारस्य मोक्षहेतुत्वे मानञ्च यदात्मानं विजानीयादहमस्मीति पूरुषः। किमिच्छन् कस्य कामाय संसारमनुसंसरेदिति। २॥

इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः आदिविद्वान् सिद्ध इति कापिलाः क्लेशकर्म्मविपाकाशयैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्र इति महापाशुपताः शिव इति शैवाः पुरुषोत्तम इति वैष्णवाः पितामह इति पौराणिकाः यज्ञपुरुष इति याज्ञिकाः सर्व्वज्ञ इति सौगताः । निरावरण इति दिगम्बराः उपास्यत्वेन देशित इति मीमांसकाः लोकव्यवहारसिद्ध इति चार्व्वाकाः यावदुक्तोपपन्न इति नैयायिकाः किं बहुना यं कारवोऽपि विश्वकर्म्मेत्युपासते तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्म्मादिवदासंसारं सुप्रसिद्धानुभवे भगवति भवे सन्देह एव कुतः किं निरूपणीयं तथापि न्यायचर्च्चेयमीशस्य मननव्यपदेशभाक् । उपासनैव क्रियते श्रवणानन्तरागता । श्रुतो हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणादिषु इदानीं मन्तव्यो भवति श्रोतव्यो मन्तव्य इति श्रुतेः आगमेनानुमानेन ध्यानाभ्यासरसेन च । त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति स्मृतेश्च । तदिह संक्षेपतः पञ्चतयी विप्रतिपत्तिः अलौकिकस्य परलोकसाधनस्याभावात् अन्यथापि परलोकसाधनानुष्ठानसम्भवात् तदभावावेदकप्रमाणसम्भवात् सत्त्वेऽपि तस्याप्रमाणत्वात् तत्साधकप्रमाणाभावाच्चेति । २ ॥

शुद्धोऽद्वितीयरहितः बुद्धो बोधस्वरूपः आदौ सर्गादौ विद्वान् चिद्रूपः सिद्धः अष्टविधैश्वर्य्यवान् अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः कर्म्म धर्म्माधर्म्महेतुर्यागहिंसादिः जात्यायुर्भोगा विपाकाः धर्म्माधर्म्मौ आशयाः निर्म्माणार्थं कायो निर्म्माणकायः सम्प्रदायो वेदः प्रद्योतक इति प्रकाशकः वेदस्य नित्यत्वात् घटादौ कर्त्तव्येऽनुग्राहकः शिवयिता शिवो निस्त्रैगुण्यः पितामहो जनकस्यापि जनकः इज्यते इति यज्ञः सर्व्वज्ञः क्षणिकसर्व्वज्ञ आवरणमविद्यारागद्वेष

मोक्षाभिनिवेशाः उपास्यत्वेन देशितोमन्वादिः यावदुक्तेषु यदुपपन्नं तेनोपपन्नः चरमं शाखा। शाब्दलिङ्गावप्यनुमित्सयानुमितेर्न संशयासत्त्वं दोषाय। तुष्यत्विति न्यायेन संशयमाह तदिहेत्यादि। ३॥

धर्म्माधर्म्मात्मकालौकिकपरलोकसाधने विप्रतिपन्नं प्रति साधनं सिद्धे च तस्मिन् तदधिष्ठातृतया ईश्वरसिद्धिः अचेतनस्य कारणस्य सचेतनाधिष्ठानेनैव कार्य्यजनकत्वात् तत्साधनायाह।

सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः। ४॥

अलौकिकोऽतीन्द्रियः परलोकहेतुरस्तीति प्रतिज्ञा तत्र प्रथमतः कारणसामान्यसाधनाय सापेक्षत्वादिति सापेक्षत्वं कादाचित्कत्वं तथाच कार्य्यं सहेतुकं कादाचित्कत्वात् भोजनजन्यतृप्तिवत्। ननु घटादिहेतोः सदातनत्वे घटादेरपि सदातनत्वापत्तिः तथा च तस्य कादाचित्कत्वं बाध्यम् एवं तत्कारणपरम्परापि कादाचित्की सहेतुका वाच्या इत्यनवस्थायामुक्तमनादित्वादिति वीजाङ्कुरवत् प्रामाणिकीयमनवस्था न दोषायेत्यर्थः। ननु एकैव कारणमस्तु किं वा नानागुणात्मिका प्रकृतिरेव तथास्त्वित्यत आह वैचित्र्यादिति कार्य्यं विचित्रकारणवत् विचित्रकार्य्यत्वात्। ननु दृष्टं यागाद्येव कारणमस्तु किमदृष्टेनेत्यत आह विश्ववृत्तितइति विश्वेषां परलोकार्थिनां यागादौ प्रवृत्तितः स्वर्गादिफलकत्वज्ञानमेव यागादिप्रवृत्तिजनकं यागादेश्च तज्जनकत्वं तत्कालावस्थायिव्यापारं विना न सम्भवतीति अदृष्टसिद्धिः। नन्वदृष्टं न भोगसमानाधिकरणं किन्तु भोग्यनिष्ठतयैव भोगजनकमित्यत आह प्रत्यात्मनियमादिति भुक्तेर्भोगस्य प्रतिनियतात्मवृत्तित्वात् व्यधिकरणादृष्टस्य भोगजनकत्वेऽतिप्रसङ्गात्। ४॥

अकस्मादेव भवति न किञ्चिदपेक्ष्य कार्य्यमिति अतएवानिमित्ततोभावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनादिति पूर्व्वपक्षसूत्रं तत्राह।

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च ।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ५ ॥

अकस्मादिति किं हेतुनिषेधपरं भवननिषेधपरम् अतिरिक्तपारमार्थिकहेतुनिषेधपरं वा अत्रोभयत्राहेतुकत्वमलीकहेतुकत्वं वा पर्य्यवस्यति स्वभावादित्यर्थपरं वा स्वं कार्य्यम् अनुपाख्यमलीकम् अवधेर्नियतत्वतः नियतावधिककार्य्यदर्शनात् अनियतावधिकत्वे च कादाचित्कत्वव्याकोप इति भावः ॥ ५ ॥

नन्वनादिश्चेत् कार्य्यकारणप्रवाहः कादाचित्कत्वान्यथानुपपत्त्या कल्प्यस्तदा वह्नित्वावच्छिन्नस्य तृणादिव्यभिचारितया तृणाद्यकारणत्वे कादाचित्कत्वव्याकोपः कारणान्तरस्य च वक्तुमशक्यत्वात् तत्र वह्न्यनुकूलैकशक्तिमत्त्वेन कारणता शक्तिश्च पदार्थान्तरं प्रतिव्यक्ति नाना अनित्ये अनित्या नित्ये नित्यैव सा शक्तिरनित्ये भावहेतुजा इति तत्सिद्धान्तात् । वह्न्यनुकूला तृणारणिमणिनिष्ठा शक्तिर्नित्येति तु मतान्तरम् । न्यायमतन्तु तृणादिजन्यतावच्छेदकं वैजात्यमेव विजातीयेष्वेकजातीयकार्य्यानुकूलशक्तिकल्पने धूमादिना वह्न्यनुमानं न स्यात् न स्याच्च तृणफुत्कारसमवधानस्य निर्मन्थनारणिसमवधानस्य प्रतिफलितरविकिरणमणिसमवधानस्य च प्रतिनियमः कारणतावच्छेदकावच्छिन्नस्यैव कारणतावच्छेदकान्तरावच्छिन्नसमवधाने कार्य्यजननस्य दृष्टत्वात् फुत्कारमणिसम्बन्धादितोऽपि वह्न्यापत्तेः । यदि च तृणफुत्कारादिसम्बन्धादिषु वह्न्यनुकूला एका शक्तिः कल्प्यते तदा नैतत् समाधानं परन्तु तार्णवह्न्यादिनिष्ठं वैजात्यं प्रत्यक्षसिद्धं दीपत्वादिवदिति न पदार्थान्तरशक्तिकल्पनम् । अमुमर्थमाह ।

प्रवाहो नादिमानेष न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥ ६ ॥

एष कार्य्यकारणप्रवाहः नादिमान् अनादिः विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः अन्वयव्यतिरेकयोस्तस्त्वे नियतत्वे निर्व्वाह्ये यत्नवता भाव्यं यतः कारणोयः वैजात्यं कल्पनीयमिति भावः। वह्नि सामान्यं प्रति तु विजातीयोयोरप्यपूर्व्वस्तेजः कारणम्। ६॥

ननु यथा एक एव दीपः आलोककारी वर्त्तिविकारकारी घटादि प्रकाशकारी च तथा एकमेव ब्रह्म किं वा कार्य्यकारणयोरभेदात् प्रतिपुरुषं विभिन्नबुद्धेरभिन्ना प्रकृतिरेव हेतुरस्तु तथाच नादृष्टाधिष्ठातृतयेश्वरसिद्धिरित्यत आह।

एकस्य न क्रमः क्वापि वैचित्र्यञ्च समस्य न।
शक्तिभेदोन चाभिन्नः स्वभावोदुरतिक्रमः। ७॥

एकस्य कारणस्य निरपेक्षस्य न कार्य्याणां क्रमः समस्य एकजातीय कारणस्य प्रयोज्यश्च न कार्य्याणां वैचित्र्यं वैजात्यं तथाच क्रमिककार्य्य निर्व्वाहकतया क्रमिककारणसिद्धिः विजातीयकार्य्यजनकतयाच विचित्रहेतुसिद्धिरित्यर्थः। शक्तिभेदादेव सजातीयादेकस्मा त् कार्य्यवैजात्यमिति शङ्कां निराकुरुते शक्तिभेदेन चाभिन्न इति चो हेतौ न शक्तिभेदः अभिन्नो यतः शक्तिशक्तिमतोरभेदात् भेदे च तस्यैव कारणत्वस्वीकारे एकमतकारणत्वभङ्गाद्वैतापत्तिरित्यर्थः। ननु स्वभावादेव एककारणस्य विचित्रकार्य्यनिर्व्वाहकत्वमित्यत आह स्वभावो दुरतिक्रम इति एकस्मिन् कार्य्ये जनयितव्ये यः स्वभावः कार्य्यान्तर जननकाले तस्यानुवृत्तौ दहनस्यापि जलादिवं स्यात् स्वभावस्य दुराग्रहत्वादित्यर्थः। प्रदीपस्थले तत्तत्कार्य्यसामग्रीभेदकल्पनादिति भावः। ७॥

ननु दण्डादिर्घटादौ हेतुरस्तु न तु यागादिः स्वर्गादिहेतुरित्यत आह।

विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा।

दृष्टलाभफला वापि विप्रलम्भोऽपि नेदृशः ॥ ८ ॥

विश्वेषां परलोकार्थिनां स्वर्गाद्यर्थं यागादौ प्रवृत्तिर्व्विफला न च वा दुःखमात्रफलिका प्रवृत्तेरिष्टसाधनताधीसाध्यत्वात् न च दृष्टलाभफला पूजाख्यातिधनादिफला तन्निरपेक्षैरपि तदाचरणात् । केनचित् प्रतारकेण स्वर्गादिफलकतया यागादिकं प्रकल्प्य स्वयमनुष्ठाय वञ्चितो लोकः प्रवर्त्तते इत्यत्र तु विप्रलम्भोऽपि नेदृश इति क एवं लोकोत्तरो यः परप्रतारणार्थं नानाविधक्लेशहेतुककर्म्मभिरात्मानमवसादयेत् तथाच यागादिप्रवृत्तिरेव स्वर्गादिफलकत्वे यागादेर्म्मानमिति । ८ ॥

ननु यागादिकं स्वर्गादिहेतुरस्तु न तु तज्जन्यादृष्टं तथेत्यत आह ।

चिरध्वस्तं फलायालं न कर्म्मातिशयं विना ॥
सम्भोगो निर्व्विशेषाणां न भूतैः संस्कृतैरपि । ९ ॥

चिरध्वस्तं यागादिकर्म्मातिशयं तत्फलानुकूलव्यापारं विना फलाय न अलं समर्थं चिरध्वस्तकारणस्य व्यापारद्वारैव हेतुत्वं यथा अनुभवस्य संस्कारद्वारकस्य स्मृतौ । ननु भोग्यनिष्ठमदृष्टं कारणमस्तु इति जिज्ञासायामाह सम्भोग इति निर्व्विशेषाणामदृष्टरूपविशेषगुणशून्यानाम् आत्मनां सम्भोगः प्रत्यात्मनियतो भोगः संस्कृतैरपि अदृष्टवत्तया स्वीकृतैरपि भूतैर्न स्यात् भूतानां शरीरादीनां सर्व्वात्मसाधारण्यात् तददृष्टाकृष्टैरेव शरीरेन्द्रियादिभिस्तद्भोगजननादित्यर्थः । ९ ॥

ननु भोग्यादिनिष्ठो धर्म्मविशेषोऽतीन्द्रियः प्रतिनियतभोगादिनियामकोऽस्तु यथा दाहादिनियामको वह्न्यादिनिष्ठः शक्तिभेदः अन्यथा तादृशादेव करतलानलसंयोगात् सति प्रतिबन्धके दाहापत्तेः । न च मण्याद्यभाव एव कारणमस्त्विति वाच्यं कारणत्वस्य भावत्वव्याप्तत्वात् किन्तु शक्तिनाशं करोतीति मण्यादिः प्रतिबन्धक

उच्यते तथाच शक्तिः स्वीकार्य्या इत्यत आह ।

भावो यथा तथाभावः कारणं कार्य्यवन्मतः ।

प्रतिबन्धोविसामग्री तद्धेतुः प्रतिबन्धकः । १० ॥

यथान्वयव्यतिरेकादिना अभावोध्वंसः कार्य्यः तथा कारणमपि कारणत्वं भावत्वव्याप्तमित्यस्याप्रयोजकत्वात् । अकिञ्चित्करस्य प्रतिबन्धकत्वानुपपत्तिरित्यत आह प्रतिबन्धइति विसामग्री कारणाभावः स च प्रकृते मण्याद्यभावस्याभावोमण्यादिस्तत्समवधानहेतुः पुरुष एव प्रतिबन्धकः स्वार्थे कप्रत्ययेन च मण्यादौ प्रतिबन्धकपदप्रयोग इति भावः । मीमांसकास्तु उत्तेजकाभावकूटविशिष्टमण्यभावत्वेन हेतुत्वे गौरवात् लाघवाच्छक्तिर्नित्या वह्न्यादौ कल्प्यते प्रतिवन्धके सति शक्तिकुण्ठनम् । यत्तु शक्तिः प्रथमतोवह्निकारणजन्या वह्निनिष्ठा प्रतिबन्धकेन च तस्या विनाशे उत्तेजकेन च पुनर्जननं न च शक्तेरनियतहेतुकत्वमिति वाच्यं शक्त्यनुकूलशक्तिमत्त्वेन कारणत्वादिति तन्न वह्निनिष्ठनानाशक्तिकल्पनापेक्षया उत्तेजकाभावविशिष्टमण्यभावस्यैकस्यैव वरं हेतुत्वौचित्यात् तथाचाकुण्ठितशक्तिरेव तत्र कारणतावच्छेदिका कल्प्यते इत्याहुः तन्न शक्तिकुण्ठने प्रतिबन्धकस्य हेतुत्वमुत्तेजकस्य कुण्ठितत्वविनाशकत्वमित्याद्यनन्तशक्तिकल्पनापत्तेरिति दिक् । १० ॥

ननु व्रीहीन् प्रोक्षति व्रीहीन् वहन्ति इत्यत्र प्रोक्षणजन्यः कालान्तरभाव्यवघातजनकोव्यापारो व्रीहिनिष्ठः कल्प्यते प्रोक्षिता एव व्रीहयोऽवघाताय कल्पन्तइति वाक्यशेषात् । किञ्च योयद्रत फलार्थितया क्रियते स तन्निष्ठफलजनकव्यापारजनकः यागवत् किञ्च व्रीह्यादीनामाप्रदमासवत्तभङ्के व्रीह्यादिनियमानुपपत्तिः । एवं माघकर्षणादिना भूमिनिष्ठा कृषिजन्या शक्तिर्निर्व्वाच्या ।

अत्रोत्तरम् ।

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः ।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः ॥ ११ ॥

प्रोक्षणादिभिः संस्कारोऽदृष्टं पुंसः पुंसि इष्टः स्वीकृतः प्रतिव्रीहि नानाशक्तिकल्पनापेक्षया एकस्यैवादृष्टस्यात्मनिष्ठस्य प्रोक्षणादिजन्यस्य लाघवेन कल्पनात् दृष्टद्वाराभावे सति चिरध्वस्तस्य कालान्तरभाविफलानुकूलस्य धर्म्मजनकत्वकल्पनाच्च संस्कृतो व्रीहिरिति प्रत्ययबलाच्च तस्य स्वरूपसम्बन्धेन व्रीहिनिष्ठत्वं कल्प्यते एतेनाभिमन्त्रितशरःपक्षादावपि तत्तत्फलानुकूलमदृष्टं पुरुषादिनिष्ठं व्रीहीनिति च शक्तून् प्रोक्षति इत्यादाविव प्रोक्षणादिजन्यजलसंयोगादिरूपपरसमवेतक्रियाजन्यफलशालितया कर्म्मता। यो यद्गतफलार्थितया क्रियते स तन्निष्ठफलजनक इति च शत्रुनिष्ठवधार्थं क्रियमाणश्येनादौ स्वनिष्ठफलजनके व्यभिचारि। यथाद्युत्पत्तिनियमार्थमाह स्वगुणाः परमाणूनां पाकजादयो विशेषा विशेषकाः तेन पाकजरूपरसादिविशिष्टाः परमाणवस्तत्कार्य्यमारभन्ते। चिकित्सास्थले तु धातुसाम्यमेव भेषजपानस्य रोगादिनाशफले जनयितव्ये द्वारमितिभावः ॥ ११ ॥

ननु यत्र पाकजेन विशेषस्तत्र वाय्वादौ कथमुष्णस्पर्शादि करकादौ च प्रतिरुद्धं द्रवत्वमिति कथञ्च प्रतिमादौ प्रतिष्ठादेरुपयोगः तयाच प्रतिष्ठाजन्यः शक्तिश्चाण्डालादिस्पर्शनाश्या पूज्यताप्रयोजिका स्वीकार्य्या इत्यत आह ।

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः ।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥ १२ ॥

निमित्तभेदः अदृष्टभेदः देवताः प्रतिष्ठाविधिना सन्निधानेनाहङ्कारममकारादिना आराधनीयतामासादयन्ति प्रतिष्ठाविधिना देवतानां प्रतिमादौ अहङ्कारममकारौ चाण्डालादिस्पर्शे च तादृशा-

भिमानाभावः देवताचैतन्यविवादेऽपि यथार्थपूजितत्वधीश्च प्रतिष्ठितत्वधीश्च शूद्रादिस्पर्शाभावविशिष्टा पूज्यतानियामिका तत्र चोपयोगिनी प्रतिष्ठा । वस्तुतस्तु प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शनादिसंसर्गाभावः प्रतिष्ठाध्वंसकालीनः पूज्यताप्रयोजकः प्रतिष्ठितं प्रपूजयेदित्यत्र न प्रतिष्ठाध्वंसस्यैव प्राप्तेरिति दिक् ॥ १२ ॥

ननु तुलापरीक्षादौ परीक्षाविधिना शक्तिस्खलनादौ जन्यते तथा नमनोन्नमनादिकं फलं जन्यते इत्यत आह ।

जयेतरनिमित्तस्य शक्तिलाभाय केवलम् ।
परीक्ष्यसमवेतस्य परीक्षाविधयो मताः ॥ १३ ॥

जयश्चेतरः पराजयः तन्निमित्तस्यादृष्टस्य परीक्षणीयसमवेतस्य शक्तिलाभाय फलानुकूलसहकारित्वलाभाय परीक्षाविधयो मताः स्वीकृताः । योऽहमनेन परीक्षाविधिना तुलामारूढः सोऽहं पापवान् निष्पापो वेति ज्ञानं सहकारि यदा शक्तिलाभाय जननाय तथा च प्रतिज्ञानुरूपां शुद्धिमपेक्ष्य धर्मोऽशुद्धिमपेक्ष्याधर्मो जन्यते । एतेन ब्रह्मवधाकरणादिना पुण्यस्याजननात् कथन्तस्य सहकारि तादृश ज्ञानं स्यादित्यपि परास्तम् ॥ १३ ॥

साङ्ख्यास्तु पुरुषश्चैतन्याश्रयः अकारणं अतएव कूटस्थो नित्यः प्रकृतिश्चाचेतना परिणामिनी नित्या एका प्रकृतेश्च प्रथमं परिणामो बुद्धिर्महत्तत्त्वं तन्निष्ठा धर्माः ज्ञानाज्ञानैश्वर्य्यानैश्वर्य्यवैराग्यावैराग्यधर्माधर्मरूपाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्माश्चेत्यष्टौ वा भावनायाश्चानङ्गीकारात् अनुभवस्यैव स्मृतिकाले सूक्ष्मतयावस्थानात् अचेतनायाः प्रकृतिकार्य्याया बुद्धेश्चैतन्याभिमानान्यथानुपपत्त्या स्वाभाविकचैतन्यस्वरूपः पुरुषः सिद्धः धर्मधर्म्मिणोरभेदात् । तत्र प्रकृतेर्महान् महतोऽहङ्कारस्तस्माद्रूपरसगन्धस्पर्शशब्दतन्मात्राणीति पञ्च चक्षुःश्रवणघ्राणरसनात्वङ्मनांसि वाक्पाणिपादपायूपस्थानि

इन्द्रियाणि तन्मात्रैः पञ्च महाभूतानि पृथिव्यप्तेजोवाय्वाकाशानि जायन्ते । तदुक्तम् । मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः । पञ्च महाभूतान्येकादशेन्द्रियाणि चेति षोडश चैतन्यस्य नित्यस्य स्वाभाविकत्वे अनिष्टविषयावच्छिन्नस्वाभाव्येऽनिर्म्मोक्षः स्यात् प्रकृत्यधीनत्वेऽपि विषयावच्छेदकत्वस्य प्रकृतेर्नित्यतया तथैवानिर्म्मोक्षप्रसङ्गः घटादेरनित्यस्यापि स्वाभाविकचैतन्यावच्छिन्नत्वे दृष्टादृष्टविभागानुपपत्तेश्च इन्द्रियमात्रापेक्षायदि विषयचैतन्यावच्छेदस्तथापि व्यासङ्गानुपपत्तिरतो मनः स्वीकार्य्यं यत्सम्बन्धेन इन्द्रियस्य विषयीयचैतन्यावच्छेदनियामकत्वं स्वप्नदशायां व्याघ्रत्वाभिमानिनो नरोऽहमित्यभिमानः अतस्तन्नियमाय नियतविषयाभिमानव्यापारको ऽहङ्कारोऽपि स्वीकार्य्यः जाग्रत्स्वप्नसुषुप्तिषु श्वासप्रश्वासदर्शनात् सव्यापारं यदनुवर्त्तते तद्बुद्धितत्त्वं प्रागुक्तभावात्मकयोगि स्वीकार्य्यं तस्य ज्ञानरूपपरिणामेन सम्बद्धो विषयः पुरुषस्य स्वरूपतिरोधायकः एवञ्च बुद्धितत्त्वनाशादेव विषयावच्छेदाभावात् पुंसो मोक्षः भेदाग्रहाच्च चेतनोऽहं करोमीत्यभिमानः । तदुक्तं प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते इति । सा च बुद्धिस्त्र्यंशवती पुरुषोपरागः विषयोपरागः व्यापारावेशश्च ममेदं कर्त्तव्यमित्यत्र ममेति चेतनोपरागः बुद्धिचेतनयोर्भेदाग्रहात् अतात्त्विकः इदमिति विषयोपरागः तदुभयायत्तो व्यापारावेशो बुद्धावारोपितचैतन्यस्य विषयेण सम्बन्धः ज्ञानं ज्ञानेन सम्बन्धश्चेतनोऽहं करोमीत्युपलब्धिरित्याहुः । अत्राह ।

कर्तृधर्म्मा नियन्तारश्चेतिता च स एव नः ।
अन्यथानपवर्गः स्यादसंसारोऽथ वा ध्रुवः ॥ १४ ॥

कृतिसमानाधिकरणा ज्ञानवद्धर्म्माधर्म्मादेवञ्चाः भोगस्य इति

सामानाधिकरण्यात् एवञ्चेतिता चेतनः स एव कृतिमानेव नोऽस्माकं मतः चेतनोऽहं करोमीतिप्रत्ययबलात्। दूषणान्तरमाहान्यथेति यदि बुद्धिर्नित्या तदा बुद्ध्युपहितात्मनः सर्व्वदावस्थानात् अनिर्म्मोक्षः स्यात् यद्यनित्या तदोत्पत्तौ वाच्या अनित्यभावस्यानुत्पत्त्यभावात् तथाच तदुत्पत्तेः प्राक् तदाश्रयधर्म्मादेरप्यभावेन बुद्धितत्त्वस्यानुत्पत्तौ नियतशरीरेन्द्रियादिकार्य्यानुत्पत्तौ असंसारः स्यादित्यर्थः ॥ १४ ॥

चार्व्वाकस्तु भवतु चेतनधर्म्मोऽदृष्टं चेतनश्च न नित्यविभुः किन्तु कायाकारपरिणतभूतविशेषः गौरोऽहं जानामीति प्रतीत्या रूपवत्त्वसिद्धेरित्यत आह।

नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात्।
वासनासंक्रमो नास्ति न च गत्यन्तरं स्थिरे ॥ १५ ॥

शरीरस्य चैतन्ये बाल्यदशायामनुभूतस्य यौवने स्मरणं न स्यात् चैत्रदृष्टस्य मैत्रेणास्मरणमिव। न च बाल्ययौवनयोरेकं शरीरम् अपक्रमस्य विनाशात् परिमाणभेदेन द्रव्यभेदात् गुर्व्वपरिमाणनाशस्याश्रयनाशहेतुत्वात्। न च कारणेनानुभूतस्य कार्य्येण स्मरणं स्यादिति वाच्यं वासनासंक्रमाभावात् अन्यथा मात्रानुभूतस्य गर्भस्थेन स्मरणापत्तेः। ननूपादानवासनाया उपादेये संक्रमः स्यादित्यत आह न च गत्यन्तरं स्थिरे इति स्थिरे स्थिरपक्षे पुञ्जात् पुञ्जान्तरोत्पत्तेरभावात् करादिशरीरस्योपादानं वाच्यं विच्छिन्ने करादौ तदनुभूतस्य स्मरणं न स्यात् खण्डशरीरे विच्छिन्नकरादेरनुपादानत्वात्। न च परमाणूनां चैतन्यं तेषाञ्च स्थिरत्वात् स्मरणं स्यादिति वाच्यं तथा सति स्मरणस्यातीन्द्रियत्वप्रसङ्गात् तन्निष्ठरूपादिवत् करपरमाण्वनुभूतस्य विच्छिन्नकरपरमाणव तन्निधावस्मरणप्रसङ्गाच्च ॥ १५ ॥

नन्वस्तु क्षणभङ्गः तथाच पूर्व्वपूर्व्वपरमाणुपुञ्जेनोपादेयोत्तरोत्तरपरमाणुपुञ्ज इति न स्मरणानुपपत्तिरित्यत आह।

न वैजात्यं विना तत् स्यात् न तस्मिन्ननुमा भवेत् ।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥ १६ ॥

वैजात्यं कुर्वद्रूपत्वं न तत् क्षणिकत्वं स्यात् सिद्ध्यतीत्यर्थः । स्थिर एव बीजादौ सहकारिलाभालाभाभ्यामेव कार्यजन्माजन्मनोरुपपत्तेः बीजत्वादिनैवाङ्कुरादिजनकतोपपत्तेः बीजव्यक्तिभेदाभावे कुतः क्षणिकत्वं स्यात् तस्मिन् जातिविशेषे च ऐन्द्रियकत्वस्यातीन्द्रियत्वेनाभ्युपगम्यमाने सत्यनुमानं न स्यात् धूमकुर्वद्रूपवह्नित्वादिनैव वह्न्यादेर्हेतुतया विजातीयकार्यजनकत्वेन सम्भावितस्य विजातीयधूमस्येव वह्निजन्यत्वसम्भावनायां धूमसामान्ये हेतुत्वानिर्णयात् तथा च कार्यकारणभावरूपविपक्षबाधकतर्काधीनव्याप्तिनिर्णयस्यासम्भवेनानुमानमात्रोच्छेदप्रसङ्ग इति तेनानुमानेन विना क्षणिकत्वस्यासिद्धिः तस्यानुमानैकगम्यत्वात् । न च तत्र प्रत्यक्षमेव मानमिति वाच्यं निर्विकल्पकस्यैव तन्मते विषयजन्यतया प्रामाण्यं तस्य च सविकल्पकोन्नेयतया क्षणिक इति सविकल्पकस्यासिद्धावसिद्धेः । किञ्चाङ्कुरकुर्वद्रूपत्वं न जातिः शालित्वादिना सङ्करात् शालित्वमपहाय यवे तस्य सत्त्वात् शालित्वस्य कुशूलस्थे शालौ तदपहाय सत्त्वात् कुर्वद्रूपे शालौ तूभयोः समावेशादिति अतएव रजतत्वादिव्याप्यं नाणैव घटत्वं विजातीयसंस्थानवदवयवकत्वरूपमुपाधिमादाय घट इत्यनुगमधीरिति ॥ १६ ॥

नन्वस्तु क्षणिके सन्देहः न च प्रत्यभिज्ञाबलेन स्थैर्यसिद्धौ कथं स इति वाच्यं स एवायं घट इत्यत्र सन्देहसत्त्वात् अत आह ।

स्थैर्यदृष्टौ न सन्देहो न प्रामाण्ये विरोधतः ।
एकतानिर्णयायेन क्षणो तेन स्थिरे मतः ॥ १७ ॥

स्थैर्ये न सन्देहस्तस्य प्रत्यभिज्ञया विषयीकरणात् तत्र प्रत्यभिज्ञानरूपे तस्य तदनुव्यवसायेन निर्णयात् प्रामाण्यमात्रेऽपि

न सन्देहः विरोधात् तथाहि सन्देहज्ञानस्य प्रामाण्यसन्देहे सन्देहस्याप्यसिद्धेः प्रामाण्यस्यासिद्धौ प्रामाण्यसंशयस्याप्यभावः कोट्यनिर्णयात्। ननु प्रत्यभिज्ञायाः प्रामाण्यसंशयः लूनपुनर्जातकेशादौ तएवामी केशा इत्यादेर्भ्रमत्वदर्शनात् तत्राह एकतेति येन प्रमाणेन विरुद्धधर्म्मसंसर्गविरहेण क्षणिके घटे यदि तस्मिन्नेव क्षणे न नानात्वं किन्त्वभेदः तदा स्थिरपक्षेऽपि नानाक्षणवर्त्तित्वेऽपि घटस्य न नानात्वं किन्त्वेकत्वम् एकस्य ज्ञानस्य नानाविषयसम्बन्धवत् एकस्य नानाकालसम्बन्धेऽपि अविरोधात् तत्तत्कारणक्रमाधीनत्वात् तत्तत्कालसम्बन्धस्य ॥ १७ ॥

तदेवं परलोकसाधनमागतं तत्रेदं शङ्कते कारणत्वं स्वाभाविकमौपाधिकं वा आद्ये नीलस्य सर्व्वान् प्रति नीलत्ववत् कारणस्य सर्व्वान् प्रत्यविशेषात् कारणत्वमपि स्यात् द्वितीये उपाधेरपि स्वाभाविकत्वे तद्दोषतादवस्थ्यात् औपाधिकत्वेऽनवस्था किञ्च कारणत्वस्य स्वाभाविकत्वे उत्पत्तेरारभ्य कार्य्यं स्यात् तत्राह।

हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तुसत्।
तद्युक्तं तच्च तच्छक्तमिति साधारणं न किम् ॥ १८ ॥

हेतुशक्तिः कारणत्वं अनादृत्य अनिश्चित्य नीलाद्यपि न वस्तुसत् न प्रामाणिकं तथाच यत्पारमार्थिकं तत् साधारणं यथा नीलादि कारणत्वञ्च यदि न साधारणम् अतो न परमार्थसदित्यपि स्यात् दृष्टान्तस्यानित्यस्य नीलस्य कारणत्वस्वीकारेण सर्व्वथाभावात् नित्यस्य नीलादेः प्रमाणागोचरत्वात्। किञ्चेत्याद्युक्तं दूषयति तद्युक्तमिति तद्युक्तं सहकारियुक्तं तत्कारणं तच्च कार्य्ये शक्तमिति नोत्पत्तेरारभ्य कारणत्वम्। कारणत्वस्य साधारण्ये चेष्टापत्तिमाह इति साधारणं न किमिति नीलादेरपि सर्व्वसाधारण्यं यत् सर्व्वैस्तथा नीलत्वादिना व्यवह्रियमाणत्वं तादृशञ्च साधारण्यं सहकारियुक्तस्य जनकत्वमित्यस्यापि तथाव्यवहारस्य सर्व्वसिद्धत्वात् ॥ १८ ॥

नन्वनधिष्ठितमदृष्टं नाजनकं नित्यविभोस्तस्य कालतो देशतश्च व्यतिरेकाभावात् व्यतिरेकसहकृतान्वयस्यैव कारणताग्राहकत्वात् तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वस्यैव कारणतात्मकत्वाच्च तथाच समवायिकारणाभावे असमवायिकारणनिमित्ताभ्यामपि न कार्य्यं जननीयं तत्प्रत्यासन्नाभ्यामेव ताभ्यां जननादित्यदृष्टस्य नित्यत्वापत्तिः तथात्र न प्रतिनियतात्मदेशकालीनभोगजनकत्वं कस्येत इत्यत आह ।

पूर्व्वभावो हि हेतुत्वं मीयते येन केनचित् ।
व्यापकस्यापि नित्यस्य धर्म्मिधीरन्यथा न हि ॥ १९ ॥

व्यतिरेकगर्भं न कारणत्वं किन्त्वनन्यथासिद्धनियतपूर्व्ववर्त्तिभावः । हि हेतौ यतो ग्राहकेन व्यतिरेकः धर्म्मिग्राहकमानेनापि तस्य प्रमापणात् इत्यतो मीयते येन केनचिद्व्यापकस्य नित्यस्यात्मनः येन केनचित् प्रमीयते अन्यथा धर्म्मिधीरेव न स्यात् तथाच धर्म्मिग्राहकप्रमाणसिद्धं तस्य हेतुत्वं घटादिकं प्रति कपालादेरन्वय व्यतिरेकदर्शनात् समवेतकार्य्यं प्रति द्रव्यस्य द्रव्यत्वेन कारणत्वस्य कल्पनात् पृथिव्यादिबाधे परिशेषेण ज्ञानेच्छादौ पृथिव्यादिभिन्न समवायिनः सिद्धिः वस्तुतः समवायिकारणताघटकोऽन्योन्याभावः यन्न कपालं तन्न घटवत् येन आत्मा न तन्न ज्ञानादिरिति धीसम्भवात् एवं येन कपालस्तन्न सम्बन्धविशेषेण न घट इति निमित्त कारणस्याधिकरणीभूतस्य कारणताप्यन्वयव्यतिरेकेण ग्राह्या एवञ्च मायाप्रकृत्यादिपदमेतत्परमिति न मायिकं जगदित्यादिश्रुतिविरोधः तथाचादृष्टाधिष्ठातृतया ईश्वरसिद्धिः ।

स्तवकार्थसंग्राहकश्लोकमाह ।

इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो
मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता ।

देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात् साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम ॥२०॥

इति प्रथमः स्तवकः ।

इति स्तवकसमाप्तौ यस्येशस्य सहकारिशक्तिः कारणं एषा सहकारिरूपा माया अप्रमवात् सर्व्वकार्य्यापेक्षणीयत्वात् दुरुन्नेयत्वात् साङ्ख्याभ्युपगमादपदेऽदृष्टे लक्षया मूलत्वात् प्रकृतिः सैव तत्त्वज्ञानप्रतिबध्यत्वात् सैवाविद्या उदिता उक्ता असौ देवो मम मनसि स्वविषयां साक्षात् साक्षात्कारि ज्ञानं बध्नातु जनयतु साक्षितया साक्षीभूय निर्व्वाहकतया साक्षित्वं शान्तः रागादिगुणशून्यः प्रपञ्चस्य मिथ्याज्ञानादेः कल्लोलः मिथ्याज्ञानपरम्परा तस्याः कोलाहलः किं वदन्ती सा विरता यस्मादिति ॥ २० ॥

इति प्रथमस्तवकव्याख्यानम् ।

अन्यथापि परलोकसाधनानुष्ठानसम्भवादिति द्वितीयविप्रतिपत्तिः अन्यथा ईश्वरं विनापि परलोकसाधनं यागाद्यनुष्ठानं सम्भवति यागादेः स्वर्गसाधनत्वस्य वेदगम्यत्वात् नित्यनिर्द्दोषतया च वेदस्य प्रामाण्यं महाजनपरिग्रहाच्च प्रामाण्यग्रह इति वेदकारणतया नेश्वरसिद्धिः योगर्द्धिसम्पादितसार्व्वज्ञ्यकपिलादिपूर्व्वक एव वा वेदोऽस्तु इत्यत आह ।

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात् ।

तदन्यस्मिन्नविश्वासान्न विधान्तरसम्भवः ॥ १ ॥

शाब्दी प्रमा वक्तृयथार्थवाक्यार्थधीरूपगुणजन्या इति गुणाधारतया ईश्वरसिद्धिः । ननु सकर्त्तृकेऽस्तु यथार्थवाक्यार्थधीर्गुणः अकर्त्तृके च वेदे निर्द्दोषत्वमेव प्रामाण्यप्रयोजकमस्तु महाजनपरिग्रहेण च प्रामाण्यग्रह इत्यत आह सर्गप्रलयसम्भवादिति प्रलयोत्तरं पूर्व्ववेदनाशादुत्तरवेदस्य कथं प्रामाण्यं महाजनपरिग्रहस्यापि तदा अभावात् शब्दस्यानित्यत्वं उत्पन्नोगकार इति प्रतीतिसिद्धं प्रवाहाविच्छेदरूपनित्यत्वमपि प्रलयसम्भवान्नास्तीति भावः । कपिलादय एव पूर्व्वसर्गादौ पूर्व्वसर्गाभ्यस्तयोगजन्यधर्म्मानुभवात् साक्षात्कृतसकलार्थाः कर्त्तारः सन्तु इत्यत आह तदन्यस्मिन्निति विश्वनिर्म्माणसमर्था अणिमादिशक्तिसम्पन्ना यदि सर्व्वज्ञास्तदा लाघवादेक एव तादृशः स्वीक्रियतां स एव भगवानीश्वरः अनित्यासर्व्वविषयकज्ञानवति च विश्वास एव नास्तीति वैदिकव्यवहारविलोप इति न विधान्तरसम्भवः ईश्वरानङ्गीकर्त्तृनये इति शेषः ॥ १ ॥

ननु सर्गप्रलयसम्भवादिति न युक्तं प्रलये मानाभावादिति अहोरात्रस्याहोरात्राव्यवहितपूर्व्वकत्वनियमात् कर्म्मणां विषमविपाक

तथा कालोपाधित्वस्य भोगव्याप्यत्वात् युगपददृष्टस्य च वृत्तिनिरोधानुपपत्तेः आम्नायस्य आम्नायजन्यत्वनियमात् सर्गादावुत्पन्नस्य आम्नायत्वाभावात् उत्तरकालेऽपि आम्नायाव्यवहारानुपपत्तेः प्रयोज्यप्रयोजकयोरभावात् सङ्केतग्रहाभावे शब्दे व्यवहारानुपपत्तेः घटादिनिर्माणे नैपुण्यस्य पूर्व्वदर्शनसापेक्षस्य सर्गादावभावात् घटादिसम्प्रदायोच्छेदादित्यादेर्बाधकाच्च तन्नाह ।

वर्षादिवद्भवोपाधिर्वृत्तिरोधः सुषुप्तिवत् ।
उद्भिद्वृश्चिकवद्वर्णा मायावत् समयादयः ॥ २ ॥

यथा वर्षादिनस्याव्यवहितवर्षादिनपूर्व्वकत्वे साध्ये राशिविशेषावच्छिन्नरविकालपूर्व्वकत्वमुपाधिस्तथाहोरात्रस्याव्यवहिताहोरात्रपूर्व्वकत्वेऽव्यवहितसंसारपूर्व्वकत्वमुपाधिर्भवोपाधिः संसारावच्छेदककालोपाधिः स एव उपाधिरित्यर्थः । सुषुप्तिकाले कतिपयव्यक्तिनिष्ठभोगजनकादृष्टनिरोधवत् कालविशेषात् समस्तात्मनां समस्तादृष्टरोधसादित्युक्तं वृत्तिनिरोधः सुषुप्तिवदिति । उद्भित् शाकविशेषस्य तण्डुलकणात् शाकविशेषबीजाच्च उद्भवः यथा वा वृश्चिकस्य गोमयाद्वृश्चिकाच्च उद्भवस्तथा कालविशेषेऽदृष्टविशेषात् केवलात् इदानीञ्च आम्नायात् आम्नायोत्पत्तिः वैजात्यस्य कार्य्यतावच्छेदकत्वान्न व्यभिचारः । यथा मायावी सूत्रसञ्चाराधिष्ठितदारुपुत्रकं कृत्वा दारुपुत्र घटमानयेत्यादि नियोज्य घटानयनं सम्पाद्य बालकस्य व्युत्पत्तौ प्रयोजकस्तथेश्वरोऽपि प्रयोज्यप्रयोजकभावापन्नं शरीरद्वयं परिगृह्य व्यवहारं कृत्वा तदानीन्तनानां शक्तिं ग्राहयति एवं घटादिसम्प्रदायमपि स्वयं कृत्वा शिक्षयति तदिदमुक्तं मायावत् समयादय इति समयः शक्तिग्रहः ॥ २ ॥

बाधके निरस्ते साधकमप्याह ।

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्म्मणोः ।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥ १ ॥

सम्प्रदायस्य वेदादिसम्प्रदायस्य ह्रासोऽनुमीयतां कुतः जन्मादेर्ह्रासदर्शनात् । अयमाशयः वेदादिसम्प्रदायोऽयमत्यन्तमुच्छिद्यते ह्रसमानत्वात् प्रदीपवत् । स्वरूपासिद्धिं द्रढयति जन्मेति पूर्वं मानस्यः प्रजास्ततः पुत्रमात्रार्थितप्रयुक्तमैथुनजाः सम्प्रति सम्भोगकामिप्रवृत्त्यावर्जितजन्मान इति जन्मह्रासः । पूर्वं ऋतुप्रभृतिषु संस्कारः ततो गर्भे ततो जननानन्तरम् इदानीं कथञ्चिदिति संस्कारह्रासः । पूर्वं सहस्रशाखस्य वेदस्याध्ययनं तत एकस्याः शाखाया इत्यादिक्रमेण विद्याह्रासः । विद्यादेरित्यादिना वृत्तिधर्म्मादिसंग्रहः पूर्व्वमुञ्छशिलवृत्तयस्ततोऽयाचितवृत्तयस्ततः कृष्यादिवृत्तयस्ततः सेवावृत्तय इति वृत्तिह्रासः । पूर्व्वं तपोध्यानयज्ञदानात्मकचतुष्पाद्धर्म्मस्ततस्त्रेतादौ एकैकह्रासः कलौ च विसंष्ठुलः एकपादेकपादिति धर्म्मह्रासः । पूर्वं यज्ञशेषभुजस्ततोऽतिथिशेषभुजस्ततः स्वार्थसाधितभुजस्ततोभृत्यादिसहभुज इत्यपि धर्म्मह्रासः । स्वाध्यायस्याध्ययनस्य कर्म्मणोयागादेः शक्तेः सामर्थ्यस्य ह्रासात् अध्ययनशक्तेः कारणस्य ह्रासात् विद्याशक्तेः कार्य्यस्य ह्रास इति पृथङ् निर्द्देशः । एवञ्च ब्रह्माण्डनाशे तदन्तर्गतप्राणिनां नाश इति प्रलयसिद्धिः । भक्ष्यपेयाद्युपरागजीविका कुतर्काभ्यासव्यग्रताभिसन्धिपाषण्डसंसर्गादिप्रतारणादिनिबन्धनान्या या वृत्तिर्यागादौ तदाम्महाजनस्तत्परिग्रहात् वेदप्रामाण्यमिति ॥ ३ ॥

स्तवकार्थसंग्राहकश्लोकमाह ।

कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्व्वन् जगत् क्रीडति ।
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवम्
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेष्वपि ॥ ४ ॥

इति द्वितीयः स्तवकः ।

तदभावावेदकप्रमाणासम्भवादिति तृतीयविप्रतिपत्तिः । भूतले घटाभाववदीश्वरस्याप्यनुपलब्धेरभावस्य ग्रहात् परमात्मनोऽयोग्य तया योग्यानुपलब्धेरभावात् नाभावग्रहोयदि तदा शशशृङ्गस्याप्ययोग्यस्य नाभावः सिद्धयेदित्यत्राह ।

योग्या दृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम् ।
क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम् ॥ १ ॥

अयोग्ये परमात्मनि योग्यानुपलब्धिः कुतः सैव बाधिका या चास्ति सा न बाधिका अन्यथाकाशधर्म्माधर्म्मादिविलयापत्तेः । शृङ्गन्तु योग्यमेव तथाच कुतः प्रतिबन्धिः । अयोग्यन्तु शशशृङ्गं न बाध्यते किन्तु साधकाभावएव तत्र । प्रकृते पञ्चमस्तवके साधकस्य वक्ष्यत्वात् । ननु कर्त्तृत्वव्यापकशरीरप्रयोजनाभिसन्धानयोरभावात् ईश्वरस्याभावोऽनुमेय इत्यत्राह क्वानुमानमनाश्रयमिति ईश्वर स्याश्रयस्य पक्षस्यासिद्धेः सिद्धौ च धर्म्मिग्राहकमानेन अनुमान बाध एव ॥ १ ॥

ननु असत्ख्यात्युपनीत ईश्वरस्तत्र कर्त्तृत्वाभावः साध्य इत्यत्राह ।

व्यावर्त्त्याभाववत्तैव भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता ॥ २ ॥

व्यावर्त्त्यः प्रतिक्षेप्यः तदभाववत्ता भाविकी पारमार्थिकी हि यतः विशेष्यता अभावस्याश्रयता तथा चालीकं न विशेष्यमित्यर्थः अभावविरहात्मत्वं प्रतियोगित्वमवस्तुनोनेति मालीकस्य प्रतिषेधाधिकरणत्ववत् प्रतिषेध्यत्वमपीति भावः ॥ २ ॥

ननु अयोग्यस्याप्यनुपलब्ध्या कथं नाभावग्रह इत्यत आह ।

दृष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने ॥ ३ ॥

योग्यानुपलब्धिरेवाभावग्राहिका अन्यथातीन्द्रियप्रमाणोच्छेदापत्तेः । योग्यता च प्रतियोगितद्व्याप्येतरयावदुपलम्भसामग्रीसमवधानम् एवञ्च शशशृङ्गे योग्यता दृष्टा दोषघटितोपलम्भसामग्री वाच्या तस्यां सत्यामनुपलब्धिर्न किन्तूपलब्धिरेव स्यात् अदृष्टे च सा योग्यता नास्तीति ॥ ३ ॥

नन्वात्मा किञ्चिदनभिज्ञः स्वनिष्ठकर्तृत्वानिरूपकक्षितिको वा आत्मत्वादित्यत्राह ।

इष्टसिद्धिः प्रसिद्धेऽंशे हेत्वसिद्धिरगोचरे ।
नान्या सामान्यतः सिद्धिर्ज्ञातावपि तथैव सा ॥ ४ ॥

प्रसिद्धे संसार्यात्मनि पक्षे इष्टसिद्धिः सिद्धसाधनम् अगोचरे अज्ञाते ईश्वरे हेत्वसिद्धिः हेतोरज्ञानं आत्मत्वेन सामान्यतः सिद्धः पक्षश्चेत् तत्राप्यस्मदादिस्तदितर आत्मा वा पक्ष इति विकल्पे सिद्धसाधनं हेत्वसिद्धिर्वा । नन्वात्मत्वं जातिः पक्षस्तत्राह ज्ञातावपीति तथैव सा आत्मत्वं जातिर्न क्षितिकर्त्री इत्यत्रेष्टसिद्धिः सिद्धसाधनं हेतोश्च तत्रासत्त्वमिति हेत्वसिद्धिरित्यर्थः ॥ ४ ॥

नन्वागमादिसिद्धात्मनि अकर्तृत्वं साध्यं तत्राह ।

आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धृता ॥ ५ ॥

आगमादेः प्रमाणत्वे तत एव ईश्वरस्य कर्तृत्वादिसिद्धौ कर्तृत्वाद्यभावसाधने बाधः । आगमादेरप्रमाणत्वे सैवाश्रयासिद्धिः उद्धृता उत्कटा ॥ ५ ॥

अत्र चार्वाकाः योग्यताविशेषणेन किं यत्र प्रत्यक्षं तत्रास्ति

इत्यनुपलब्धिमात्रमेव साधकं स्यात् अनुमानविलोपश्चेदेवं धूमदर्शनानन्तरं वह्न्यर्थप्रवृत्तिश्च सम्भावनामात्रादिति तत्राह ।

दृष्ट्यदृष्ट्योर्न सन्देहोभावाभावविनिश्चयात् ।
अदृष्टिबाधिते हेतौ प्रत्यक्षमपि दुर्लभम् ॥ ६ ॥

सम्भावना हि सन्देहः स च दृष्टौ नास्ति तस्य निश्चयात् अदृष्टौ च नास्ति अनुपलब्धौ तदभावस्यैव निर्णयात् एवमदृष्ट्या अनुपलब्ध्या हेतौ प्रत्यक्षकारणे चक्षुरादौ बाधिते सति प्रत्यक्षमपि प्रमाणं न स्यात् अनुपलब्धिकालेऽपि तस्य सत्त्वे तु व्यभिचारात् नानुपलब्धिरभावावधारणे हेतुः । एवञ्च गृहान्निर्गतश्चार्व्वाकः पुत्रदारा-द्यभावादिकमवधार्य्य विक्रोशेत् परावृत्तोऽपि कुटुम्बं नासादयेत तदा तेषां सत्त्वे चानुपलब्धिर्व्यभिचारिणी न हेतुः स्यादिति ॥ ६ ॥

ननु यद्यनुपलम्भमात्रं नाभावसाधकं तदा अयोग्योपाधिशङ्कया धूमादावपि व्यभिचारशङ्कया न व्याप्तिनिश्चयः स्यादिति गतमनुमाने-नेत्यत आह ।

शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्म्मतः ॥ ७ ॥

तद्देशतत्कालयोर्व्यभिचाराभावनिश्चयात् कालान्तरदेशान्तरस्थयोर्व्यभिचारशङ्का स्यात् कालान्तरदेशान्तरस्थज्ञानञ्चानुमानादेवेति सिद्धमनुमानं शङ्का न चेत् ततः शङ्काविरहे तरां सुतरामनुमानम् । ननु किं शङ्कानिवर्त्तकं तत्राह तर्कः शङ्कावधिर्म्मत इति विपक्षबाधकतर्काच्छङ्काविरह इत्यर्थः । मतः सम्मत इत्यर्थः । ननु तर्कस्य व्याप्तिमूलकत्वेऽनवस्थेत्यत आह व्याघातेत्यादि तर्कमूलव्याप्तौ न शङ्का व्याघातात् स्वकृतकारणं विना कार्य्योत्पत्तिशङ्कायां क्षुन्निवृत्त्यर्थं भोजनादौ पर प्रतिपत्त्यर्थञ्च शब्दप्रयोगादौ न प्रवर्त्तेतेति एवञ्च तर्कानवतारे शङ्कितोपाधिरेवाप्रयोजक इत्युच्यते । तदुक्तं यावद्व्यतिरेकित्वं शतां-

शेनापि शङ्क्यते । विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबलम् । विपक्षस्य हेतोरव्यतिरेकित्वं सत्त्वं यावच्छङ्क्यते तावद्धेतोर्न गमकत्वमिति भावः । व्यभिचारशङ्का च उपाधिशङ्काधीना । तदुक्तम् अन्ये पर प्रयुक्तानां व्याप्तीनामुपजीवकाः । तैर्दृष्टैरपि नैतेष्टा व्यापकांशाव-धारणेति । अन्ये केचन हेतवः परप्रयुक्तानां व्याप्तीनामुपजीवकाश्रयाः तथाहि उपाध्यवच्छिन्नहेतुनिष्ठा व्याप्तिः हेतुतावच्छेदकावच्छिन्न हेतुरूपितया ज्ञायते अतएव उप समीपवर्त्तिनि स्वसमानाधिकरणे स्वधर्मं व्याप्तिं आदधाति बोधयतीति उपाधिशब्दो जवाकुसमादि साधारणः तैः सोपाधिभिर्दृष्टैरपि पक्षे व्यापकांशस्यावधारणा निश्चयो नेष्टा साधारणधर्म्मेण साध्यसंशयजननादित्यर्थः ॥ ७ ॥

ननूपमानमीश्वरे बाधकं स्यात् अत्रोपमानस्यातिरिक्तप्रमाणस्यानभ्युपगमात् न बाधकमिति वैशेषिकादयः तत्र सादृश्यपदार्थान्तरस्य ग्राहकमप्रमानमिति केचित् सादृश्यं न द्रव्यं गुणः कर्म्म वा गुणागमवेनत्वात् न समवायी सप्रतियोगिकत्वात् सामान्यादिरूपत्वाच्च नाभावः सप्रतियोगिकत्वेनाप्रत्ययात् तच्च न प्रत्यक्षगम्यमिन्द्रियपातमात्रेणाप्रतीतेः । नापि प्रतियोगिज्ञानसहकृतमिन्द्रियं ग्राहकमिति वाच्यं गोसदृशो गवय इति ज्ञानानन्तरं सा गौर्गवयसदृशीत्यसन्निकृष्टगोविशेष्यकग्रहस्याप्रत्यक्षत्वात् नाप्यनुमानगम्यं लिङ्गाप्रतिसन्धानेऽपि ज्ञायमानत्वात् न शब्दगम्यं तस्यासार्व्वत्रिकत्वादिति तत्राह ।

परस्परविरोधे हि न प्रकारान्तरस्थितिः ।
नैकतापि विरुद्धानामुक्तिमात्रविरोधतः ॥ ८ ॥

न प्रकारान्तरस्थितिः नोभयात्मकत्वं हि यतः परस्परविरोधात् नैकतापि न भावाभावात्मकत्वमपि विरुद्धानामिति हेतुगर्भविशेषणं परस्परविरोधिरूपत्वात् विरोधमेव प्रतिपादयति उक्तिमात्र-

विरोधतः । नाभाव इत्युक्ते च भावत्वप्रतीतेः कथमभावता न भाव इत्युक्ते चाभावत्वप्रतीतेर्न भावत्वम् । अयमभिप्रायः सादृश्यं भावो ऽभावो वा उभयथाप्यतिरिक्तत्वाप्रसिद्धेः अभावत्वे सप्तमपदार्थत्वं भावत्वे गुणवत्त्वे च द्रव्यत्वं निर्गुणत्वे सामान्यवत्त्वे च गुणान्यत्वे कर्म्मत्वं तदन्यत्वे गुणत्वं निर्गुणनिःसामान्यभावत्वेऽसमवेतत्वे च समवायत्वं समवेतत्वे च नैकाश्रितत्वे सामान्यत्वं एकाश्रितत्वे विशेषत्वम् एवं शक्तिसंख्यादयः पदार्था निराकार्य्याः ॥ ८ ॥

ननु भवतु सादृश्यं समानधर्म्म एव तद्ग्राहकमेवोपमानं मानान्तरं स्यादित्यत आह ।

साधर्म्म्यमिव वैधर्म्म्यं मानमेवं प्रसज्यते ।
अर्थापत्तिरसौ व्यक्तमिति चेत् प्रकृतं न किम् ॥ ९ ॥

अयं गोविसदृश इति ज्ञानानन्तरं सा गौरेतद्विसदृशीति धीः प्रमाणान्तरादेवास्तु अथैतस्य तद्वैधर्म्म्यं तस्मिन्नेतद्वैधर्म्म्यं विनानुपपन्नमित्यर्थापत्तिरेवेति गोसादृश्यं गवयस्य गोर्गवयसादृश्यं विनानुपपन्नमित्यर्थापत्तिरेवेति न मानान्तरं सादृश्यग्राहकं मन्तव्यमिति ॥ ९ ॥

वैशेषिकादिभिरुपमाने दूषिते नैयायिकः प्राह ।

सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह ।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥ १० ॥

फलमित्यनन्तरं इतीत्यध्याहार्य्यं संज्ञाया गवयादिसंज्ञायाः संज्ञिना गवयत्वादिविशिष्टेन सह सम्बन्धस्य शक्तेः परिच्छेदः निश्चयः उपमानस्य मानान्तरस्य फलमुपमितिः प्रत्यक्षादेरसाध्यत्वात् इन्द्रियलिङ्गशब्दानामसामर्थ्यात् ॥ १० ॥

ननु गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यादेव शक्तिधीरस्तु गवयत्वविशिष्टो धर्म्मी गवयपदवाच्यो गोसदृशत्वादित्यनुमानाद्वास्तु तत्राह ।

सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः ।
समयो दुर्ग्रहः पूर्वं शब्देनानुमयापि वा ॥ ११ ॥

समयः गवयत्वादिजातिपुरस्कारेण शक्तिरूपसम्बन्धः स च दुर्ग्रहः शब्दादनुमानाद्वा न सम्भवति गवयत्वस्य तेन पुंसा अगृहीतत्वात् । न च सादृश्यमेव प्रवृत्तिनिमित्ततया गृह्यतां तस्य गुरुत्वेनाप्रवृत्तिनिमित्तत्वात् ॥ ११ ॥

ननु प्रथमतो गवयत्वस्याप्रतीतत्वेऽपि यदा गवयत्वं प्रत्यक्षं तदा गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्याल्लक्षणया गवयत्वं परामृश्यते तेन रूपेण शक्तिधीरस्तु तत्राह ।

श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गतिः ॥ १२ ॥

गोसादृश्यसामानाधिकरण्येन गवयपदवाच्यत्वविषयकज्ञानजनकतया शब्दस्य गवयत्वादिना शक्तिबोधे नाकाङ्क्षा अन्वयस्य पर्यवसानात् यत्र पदार्था एवान्वयविधुराः केनापि रूपेणान्वयायोग्याः तत्र तदाक्षिप्तेन तेन लक्षणीयार्थेन सङ्गतिरन्वयः गङ्गायां घोष इत्यादौ ॥ १२ ॥

ननु गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादिति सामान्यतोदृष्टमनुमानमितरप्रवृत्तिनिमित्तकत्वबाधे गवयत्वस्य प्रवृत्तिनिमित्तत्वमवगाहतामिति चेन्न व्यापकतावच्छेदकरूपेणैवानुमितेर्व्यापकविषयकत्वात् गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वादिति व्यतिरेकि च साध्याप्रसिद्ध्या न सम्भवति व्यतिरेकव्याप्त्यप्रतिसन्धानेऽपि गवयत्वाश्रयो गवयपदवाच्य इति धियोऽनुभवसिद्धत्वाच्च उपमानं प्रमाणान्तरम् । धिक्करभमतिदीर्घग्रीवमतिकठोरकण्टकाशिनमपसदं पशूनामित्यादिवाक्यार्थज्ञानानन्तरं तादृशपिण्डदर्शने करभपदवाच्यताग्रहोऽप्युप-